कज्ञानस्य लक्षणमाह १९ सर्वभूतेषु येनैकं भावमव्ययमीक्षते अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकं २० विभक्तेषु नामरू
पजातिगुणक्रियाविशेषैः व्याविद्धैकैः परस्परभिन्नेषु सर्वभूतेषु सर्वेषु ब्रह्मादिस्थावरान्तेषु भूतेषु शरीरेषु स्थावरेषु जंगमे
षु च सर्वत्र घटमठादिषाकाशवदविभक्तं निरवयवत्वान्निर्विशेषत्वाच्च विभागवर्जितमसंख्यात्मनः सर्वेनः परिपूर्णमतएकमे
करूपं तदीयधर्मकर्मादिभिरस्पृष्टमत एवातिविशुद्धं विदेकरसमव्ययं भूतेषु नश्यत्सु सत्सु स्वयमविनश्यन्तं भूतानामाविर्भाव
[illegible] तिरोभावाप्तमविकारिमादित्यवत्पमाविर्भावतिरोभावधर्मेनिर्मुक्तमविक्रियात्मनैकरूपेण सर्वदातिष्ठन्तं नित्यं यत्स्वतं
त्रमित्यर्थः एवंलक्षणं भावं नाम रूपादिकं सर्वं भाव्यते यत्र येन वा स भावः सत्यानन्दात्मा तं सच्चिदानन्दैकरसमात्मानं स्वरूपेण शुद्ध
सत्त्वसंभावितेन दिव्योद्यमतः पुरुषः इति श्रुतिः शरीरं शरीरेष्वित्यादिश्रुतिवाक्यार्थश्रवणमननात्समुत्पन्नेन ज्ञानेना
खंडाकारवृत्त्याकृतेन बुद्धिर्विद्वान् पश्यति सर्वमिदमहं च ब्रह्मैवेति स्वं च सर्वं च ब्रह्मैव पश्यति तत्तज्ज्ञानमहं तात्मविषयकं द्वै
तभ्रमविध्वंसकं सात्विकं बहुजन्मार्जितपुण्यपुंजपरिपाकसमुदितशुद्धसत्त्वसमुत्पन्नत्वात्सात्विकं विद्धि तदेतदेव विदेहमु
क्तिकारणमिति विजानीहीत्यर्थः येनात्मनोनेकत्वं पश्यति तद्राजसमित्याह २० पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथ

णि त्रिधा परिणामो धनक्षयो वा बलक्षयो वा उरपक्षयो वा आयुःक्षयो वान्यस्य वा क्षयस्तं क्षयं हिंसां प्राणिपीडां कर्मनिर्वाहे स्वसाम
र्थ्यं च पौरुषमेवानपेक्ष्यानवेक्ष्य बुद्धिबलेनाविचार्य बालवन्मोहादविवेकादारभ्यते यत्कर्म संमोहोऽविवेकाभावात्तामो
गुणान्तेन कार्यं तत् तामसमित्युच्यत इत्यर्थः। गुणभेदेन कर्तृभेदं वदन् सात्त्विककर्तारमाह २५ मुक्तसंगोऽनहंवादी धृ
१४ त्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते २६ मुक्तसंगः मुक्तः त्यक्तः संगः फलाभिसंधिलक्ष
णः कामो येन स मुक्तसंगः निष्काम इत्यर्थः अनहंवादी अहं करोमीति वदनशीलो न भवतीत्यनहंवादी अनहंमा
नित्वेपीदमुपलक्षणं धृत्युत्साहसमन्वितः धृतिः आरब्धव्यपदेहापायादौ धैर्यमुत्साहः क्रियोद्योगस्ताभ्यां समन्व
न्वितः सिद्ध्यसिद्ध्योरारब्धस्य कर्मणः सिद्धावसिद्धौ च निर्विकारः सम्यग्गीर्वाणार्पितनिर्विकारत्वादीश्वरेच्छेति हर्षविषादरहि
त इत्यर्थः एवं सत्त्वगुणसंपन्नो यः कर्ता कर्मणां स सात्त्विक इति बुधैरिष्यत इत्यर्थः एवं गुणविशिष्टत्वं सात्त्विकस्य लक्ष
णमिति सूचितं भवति। राजसकर्तारमाह २६ रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः हर्षशोकान्वितः कर्ता राजसः परिकीर्ति
तः २७ रागी कर्मफलाय ये सत्वा जनसाधनेषु कर्मसु रागो ऽस्यास्तीति रागी यद्वा रागो विषयभोगेच्छा सोऽस्यास्तीति रागी ततश्च कर्मफल
15 प्रेप्सुः कर्मणां फलं उत्तरकाले धनादिसंपत्तिं स्वर्गं च प्राप्तुमिच्छुः स्वेंद्रियतर्पणशीलत्वाल्लुब्धः परस्वाभिलाषी देवपित्र्यर्थादौ धन
त्यागासहिष्णुर्वा लुब्धः हिंसात्मकः परपीडनशीलो ऽशुचिः शास्त्रोक्तशौचरहितः कर्मणां सिद्ध्यसिद्ध्योर्लाभालाभयोर्वा हर्षशो
कान्वितो यः कर्मणां कर्ता स राजसः उक्तलक्षणो रजोगुणविशिष्टत्वाद्राजस इति मुनिभिः परिकीर्तित इत्यर्थः। रागित्वादि राजसस्य लक्ष
णमिति सूचितं भवति। तामसकर्तारमाह २७ अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः विषादी दीर्घसूत्री च कर्ता तामस उच्यते २८ रामं
अयुक्तोऽस्थिरचित्तश्चंचल इत्यर्थः प्राकृतः पामरः कार्याकार्यज्ञानविहीन इत्यर्थः स्तब्धोऽनम्रः महत्सु विनयरहित इत्यर्थः शठो गूढवि १४
प्रियकारी सर्ववंचक इत्यर्थः नैष्कृतिकः निकृतिर्मनोवाक्कायैः परतिरस्कारस्तां तन्वानो नैष्कृतिकः परावमानीत्यर्थः अलसो मंदः कार्येष्ववश्य

तार्थः स्वप्रयुक्तात्मस्वनाशित तत्त्वार्थवद् यथार्थविषयकं यतः एवाल्पं अल्पविषयत्वेनाल्पफलत्वेन चाल्पं निकृष्टमित्यर्थः यदेवं
लक्षणं ज्ञानं तेन तामसं बुद्ध्यज्ञ ज्ञात्वाभिः तामसे यज्ञदानादिकर्मानुष्ठानं संप्राप्नते मे गुणकार्यत्वात् तामसमिति कपिलादिभिरुदाहृतमुच्य
ते इत्यर्थः जन्मानेकशतैः सम्यगनुष्ठित सात्विक यज्ञदानादि सत्कर्मपरिपाकसमुत्पन्नं सात्विकं ज्ञानं मोक्षायैव भवति । राजसं तु स्व
र्गाद्युत्पत्त्या पनिरूफलं तामसं ज्ञानं तु केवलं पशुव्यवहारगोचरं जननमरणादुःखप्रवाहायैव भवति न तु स्वर्गापवर्गाये
ति सूचितं भवति सत्वादिगुणभेदात् कर्मणस्त्रैविध्यं प्रतिपादयन्नादौ तु सर्गानमनुष्ठेयं सात्विकं कर्माह २२ नियतं संगरहि
तमरागद्वेषतः कृतं अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते २३ नियतं श्रुतिस्मृतिप्रामाण्यवशात्कर्तव्यत्वेन विहितं यत्तन्नियोदान
लक्षणं संगरहितं संगः कर्ताहमिति निवेशो हंकारस्तच्छून्यमनहंकारमरागद्वेषतः सुखसाध्यत्वेनास्य लसाधनत्वेवा कर्मणि रागः
दुःखसाध्यत्वे दुःखः फलसाधनत्वे वा कर्मणि द्वेषस्तु जायते रागद्वेषौ प्रराग द्वेषौ न रागद्वेषौ यस्य सोऽयमनिष्ट यः कर्मणोः स्व
भवेद्द्वेषभावरागद्वेषतः इति यावत्तेन रागद्वेषेण सात्विकेनाफलप्रेप्सुना निष्कामेन कर्त्रा कृतं यत्कर्म सात्विकं सत्वगुणकार
णमिति महर्षिभिः प्रोच्यते राजसमाह २३ यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः क्रियते बहुलायासं तद्राजसमुदाहृतं २४ यत्तु
शब्दो वैलक्षण्यार्थः वा चार्थः पुनरप्यर्थः कामेप्सुना काम्यत इति कामः कर्मफलं तमाप्तुमिच्छता कामेप्सुना साहंकारेण वापि च अह
मेवं कर्म करोमि फलापेक्षमिति निवेशो हंकारस्तद्रहितस्सात्विकः स्यादिति सत्वपराजसस्तेनापि उक्तत्वान्साहंकारो हमिदं करोमीत्य
भिमाना ईश्वरयुक्तस्तेन साहंकारेणापि वा कर्त्रा बहुलायासं बाहुल्यानंदीनरणोपयावहे लोभहानोपासः स्वमोपस्मिन् कर्म सर्वात्म
मनादौ भवतीति यावत्तु कर्म क्रियते तत्कर्म राजसफलकामनया चाहंकारेणापि रजः कार्येणापि रजः कार्ये तत्क्रिया नोधिकार
णात्क्रियमाणत्वाद्राजसं तत्कर्म निमुनिभिरुदाहृतमित्यर्थः तामसं कर्माह २४ अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषं मोहा
दारभ्यते कर्म यत्तत्तामसमुच्यते २५ अनुबन्धः उत्तरभाव्यनर्थः ते न कर्मणा लभन्ते तमनुबन्धं पश्चाद्भाव्यनर्थः स्यात्तस्मिन् कर्म

णेतान्कार्यं च यया बुध्या बुद्ध्वा विचरन् एतत्कुभयं स्त्रीरौरवह्निमज्य च जानाति अतस्येदं साधनं न त्वस्येदं साधनमाहरू सो ऽ इदं
नैयमाहृत्स्येदं त्यजनत्वमिदमतानमिदं तानं भयं बंधो पंमो स इति स्वाधिकारानुरूपेण साध्यसाधनमेदं बंधमोक्षं च तत्त्वगपपावेजिप्ररूपस्ता
१५ बुद्धिः सात्त्विकी बहुजन्मसुकृतपरिपाकसमुत्पन्नशुद्धसत्त्वकार्यत्वात्सात्त्विकीति बुधैरुच्यते इत्यर्थः एतेन सात्त्विक्येव बुद्धिः मुमु
क्षोः श्रेयस्ते न संपादनीयेति सूचितं राजसीं बुद्धिमाह ३० यया धर्ममधर्मं च कार्यं चाकार्यमेव च अयथावत्प्रजानाति बुद्धिः सा
पार्थ राजसी ३१ धर्मं विहितमधर्मं प्रतिषिद्धं च कार्यं चाकार्यं च देशकालादेरनुकूल्ये प्रातिकूल्ये च कर्तव्याकर्तव्ये कर्माणि च का
रद्यथानर्थास्तेना रूपेण यथावत्पावद्यानिर्णयेनासाकल्येन संदेहेन यया बुध्या प्रजानाति प्ररूपस्ता बुद्धिः राज
सी रजोगुणसंपन्नत्वाद्राजसीत्युच्यते तामसीं बुद्धिमाह ३१ अधर्मं धर्ममिति या मन्यते तमसावृता सर्वार्थान्विपरीतांश्च
बुद्धिः सा पार्थ तामसी ३२ धर्ममधर्मं कार्यमकार्यमर्थमनर्थं च यया तमसा तमोगुणेनावृतया स्य पूर्व कोरया बुध्या
सर्वार्थान्वैपरीत्येन मन्यते गृह्णाति प्ररूपस्ता तामसी बुद्धिरित्यर्थः धृतेरपि त्रैविध्यं वदन् सात्त्विकीं धृतिमाह ३२ धृत्या
यया धारयते मनःप्राणेन्द्रियक्रियाः योगेनाव्यभिचारिण्या धृतिस्सा पार्थ सात्त्विकी ३३ योजेन ब्रह्मणि चित्तैकाग्र
16 लक्षणेन समाधिना अव्यभिचारिण्या अविनाभूतया धृत्या धारणात्मिकया धीवृत्त्या यया मनःप्राणेन्द्रियक्रियाः
मनसः प्राणानामिन्द्रियाणां चक्षुरादीनां च क्रियाः प्राप्यप्राप्याः बहिः प्रवृत्तिरूपास्ताः सर्वा धारयते ब्रह्मणि ध्येये धारयति निय
च्छति ब्रह्मणि चित्तैकाग्रतायां स्थिरा यो अस्यां मनः प्राणेन्द्रियक्रियाः सर्वाः स्वयमेव स्थिरा भवंति तेनैकाग्रताधारणा रा राम०
ज्ञे यौगाव्यभिचारित्वं मनःप्राणेन्द्रियक्रियाधारकत्वं च महैव सिध्यतीत्यत एवोच्यते योगेनाव्यभिचारिण्या यया धृत्या म
नःप्राणेन्द्रियक्रिया धारयते सा धृतिर्धारणाशक्तिः सात्त्विकी शुद्धसत्त्वगुणसंभूतत्वात्सात्त्विकीत्युच्यते मुनिभिरित्यर्थः ३ १५

कर्तव्येष्वपि प्रवृत्तिरहितः श्रद्धामनस्यथे विषादी क्लिष्टचित्तः एव स्तुनिलब्धेपि तत्प्रवृत्तिरहितत्वादीर्घदर्शितो मरहितस्तमर्थे दीर्घसूत्री च सथः
कर्तव्यमपि कार्यं प्रसङ्गेन मासेन वा यः करोति स दीर्घसूत्री चिरकारीत्यर्थः एवं लक्षणः कर्मकर्ता तमसः तामसोदोषेण जडबुद्धित्वात
मसस्त्वुच्यते अयुक्तत्वादिकं तामसस्य लक्षणमिति संवृत्तिं कर्तृत्वकरणस्यापि त्रैविध्यं सत्त्वपि तु बुद्ध्यादेस्त्रैविध्यं बोधयितुमाह
२८ बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय २९ यथा पदार्थतत्त्वमध्यवसायकार्ये उभाभ्यां प्रवर्तते
जेन तस्या बुद्धेः अन्तःकरणवृत्तिविशेषस्य धृतेश्च वृत्तिविशेषस्य चकारस्तु च्यपार्थः एवकारोन्यव्यवच्छेदार्थः पृथक्प्रत्येकं गुणतः सत्त्वादि
गुणभेदेन त्रिविधं त्रैविध्यं अशेषेण साकल्येन मया उच्यमानं शृणु यद्यपि पूर्वं तत्रानुसारेण त्रैविध्यं प्रतिपादितं तत्रापि तान्यवृत्तिसामान्यं बुद्धि
स्तु वृत्तिविशेषः ॥ निरपेक्षविवेक पर्वतनतो न पुनरुक्तिः मतं गः सत्त्वबुद्धेर्लक्षणमाह २९ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बन्धं मो
क्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ३० प्रवृत्तिं च शास्त्रविहितं धर्मं निवृत्तिं शास्त्रनिषिद्धमधर्मं च कार्याकार्ये देशकालादे
भयं ७ रानुकूल्येन कर्तव्यं प्रातिकूल्येन अकर्तव्यम् अकार्यं भयाभये भयकारणमभयं अभयकारणं अनर्थाभावं बन्धं बन्धहेतुं मोक्षं
मोक्षहेतुं च बुद्धिर्न करोति संभवात्करणार्थेनापपन्नापदार्थतत्त्वनिश्चयप्रकारिणी धर्माधर्मादिके पुरुषोधिकारी विजानाति सा
बुद्धिः सात्त्विकी प्रधानं बन्धमोक्षौ वेत्ति अन्नबन्धमोक्षपार्थेव प्रतिपाद्यत्वेन प्रवृत्त्यादिपदार्थानां तद्विशेषणत्वेनानुपयुक्तः प्रवृत्तिशब्द
जेः सत्त्वबुद्धेः कारणत्वेन कर्ममार्गः प्रवृत्तिजनः शुद्धात्मा सत्त्वमोक्षापकत्वेन प्रवृत्तिं च निवृत्तिं च निवृत्तिर्निष्कर्मत्वमार्गः संन्यासः
प्रवृत्तिजनस्य संसारबन्धात्मुक्तो भवति तां निवृत्तिं च वर्णपंसमुच्चयार्थे कार्याकार्ये कार्यमाकरणः सः अन्यः कर्मसिद्धिविषये कालेकाले पल
नेऽपि तत्तत्कार्ये तथाकार्यमाकरणं स्वपदेकर्तव्यं सतत्त्वं तत्करकार्यं ते चाभे कार्याकार्ये भयाभये प्रसाद्धिमेतिन्नभ्यमताननं संसारकारणं
पसादभयं भयाभावस्य सिद्धानितदभयं ज्ञानं मोक्षकारणं ते चाभे भयाभये बन्धमध्यासलक्षणमतावकार्यमोक्षमध्यासाभावलक्ष

तमस्सत्त्वतमः कार्याणां संशयासंभावनाविपरीतभावनाजाड्यालस्यप्रमादादीनां च समस्तभावप्रतिबंधकानां ८॥ १०

स्वयमपि विदिषदुष्प्रापं मोक्षसुखं च भवतीत्यर्थः नन्वेवं सति यतीनां मोक्षसुखप्राप्तेः सा वर्तते कारणमित्याकांक्षा
यामाह परिणामेति यदुक्तं श्वरस्यानुग्रहात्सिद्धसतत्याभ्यासाधनसंतानसंततिसनिरंतरसमाधिनापरिणामे परिपक्वतेमि
द्धे सत्सुखतो पमं भवति यथा काले कृष्यादिपायेन मा प्रमयन्ते देवानां जरामरस्तु निवर्तते केवलं भवति तथा कारणादोषापायेन मा पनेन द्धा
त्मसुखमपि यतीनां महात्मनां जन्ममरणादुःखमनाहविक्षेपकत्वादमननं तुल्यपरमानंदकरं च भवति नतो ब्रह्मविद्भिः परमहंसै
र्मोक्षसुखानुभविकामैस्साधनस्तु द्विसिद्धावेव प्रयत्नः कर्तव्यो न तु साध्यसिद्ध्युपे साधने सिद्धे साध्यं स्वयमेव सिध्यतीति यथा च
सुः सौरूप्ये सिद्धे दर्शनं च द्रष्टुर्दर्शनाल्हादसिद्ध्यतीति तद्वत् सुखमात्मबुद्धिप्रसादजं यथा तु ध्यानेनात्मा सच्चिदानंदैकलस
क्षणोपमहत्स्वमेति मा सात्क्रियते तस्माद् गुबुद्धेः प्रसादश्चिरकालनित्यनिरंतरसविकल्पकनिर्विकल्पकसमाध्यभ्यासाति
शयेन रजोरजः कार्याणां च रागद्वेषलोभमोहदंभदर्पहर्षविषादासूयाहंकारादीनां निरोधनिवृत्या सम्यक् सत्त्वः
शुद्धस्फटिकवद्दर्पणवद्वभासमानोपः स्वच्छत्वगुणाः शुद्धसत्त्वाभिधानः तस्मान्नैपतो वस्तुतो दोषनिवृत्या प्रसादश्चंद्रिका
वद्बुद्धिवृत्तेः स्वयमेवाविर्भवतीत्यात्मबुद्धिप्रसादजमित्युच्यते ननु विषयसुखवज्जायते जन्यत्वेत्वनित्यत्वपरिच्छिन्नत्वसाति
शयत्वादिदोषप्रसंगात्सुखस्यतोभयमास्यत्वोपपत्तेश्चानन्तस्य सुखे नैमित्यापत्यारूपवद्धि बुद्धिवृत्तेः शुद्धसत्त्वा प्रसाः प्रयतेन
स्वयमेव विषयो भवति नित्यसिद्धत्वात्स्वरूपसुखस्य न तु ब्रह्मविदो ब्राह्मसुखमतिक्रम्य साध्यविषयसुखवत् सुखं सुखार्थि
भिस्त्रीदेवानुभोक्तव्यमिति चेद्रवाने त्रम प्रष्टव्यः किं विषयिकं सुखं विषयधर्मो वा करणधर्मो वा कर्मधर्मो वा भोक्तृधर्मो वा एम०
देशधर्मो वा कालधर्मो वा प्रज्ञानधर्मो ज्ञानधर्मो वात्मधर्मो वा स्वरूपं वा परमानंदस्वरूपं वा दुःखाभावस्वरूपं वेति नाद्यः वि १६
षयसन्निधाने सर्वेषां सर्वेषामपि वा नरस्य गेहसुखादर्शनादुःखजनकाभावात् अन्वयव्यतिरेकानुपपत्तेः सर्वेषामपि सुखानुदयप्र

वा

27

एफकर्मपरिपाकवशात्संभावनाभ्युदयमत्वपुरुषस्यतानं सात्विकं बुद्धिः सात्विकी धृतिरपि सात्विकी मनःप्रोत्साहयपरजयो
पि सात्विका एव भवंति तानादीनां सात्विकत्वं नामवा त्यागलवनमेवततो मुमुक्षो सत्वमुद्धिरेव संपादनीयेति सिद्धं राजसी
धृतिमाह ३३ यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ३४ तुशब्दोऽव्याह
त्यर्थः यया तु धृत्या पुरुषः धर्मकामार्थान्धर्ममर्थकामं च प्राधान्येन धारयते धरति न विमुंचति प्रसंगेन धर्मादीनां प्रसक्तौ
संपादनकाले फलाकांक्षी भवति सा धर्मादीनां धात्री धृतिः राजसी तामसीं धृतिमाह ३४ यया स्वप्नं भयं शोकं विषादं मदमे
व च न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ३५ दुर्मेधा तमोदोषदूषिता मेधा बुद्धिर्यस्य स दुर्मेधाः दुर्भगः पुरुषः यया धृत्या
स्वप्नं निद्रां भयं शोकं विषादं च मदमेव सदा धारयते न तु मुंचति विद्विषी मुंचति सा निद्रादीनां धात्री धृतिः तामसीत्युच्यते सर्वत्र
वहारहेतोर्बुद्धेर्धृतेश्च त्रैविध्यमभिधाय तद्द्वारकस्यान्तःकरणानामपि सात्विकत्वादिभेदस्सूचितः एवं गुणभेदेन
कर्तृणां करणानां कर्मणां त्रैविध्यमुक्त्वा कर्मफलस्य सुखस्यापि त्रैविध्यं वदन् सात्विकसुखस्य स्वरूपमाह द्वाभ्यां
३५ सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ३६ यत्तदग्रे विषमिव परिणा
मेऽमृतोपमं तत्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजं ३७ यच्छ्रवणमनुसुखमिति सगुणनिरंतरं नित्यप्रभृत्यग्रे स्वसिद्धेः सर्वं स्वसि
द्धिसाधनस्य विषवत्स्वीकर्तुं दुष्करत्वात्स्वयम/पि विषमिव प्रागनुभवितुं चापकमेव भवति यतः स्वसाधनं सदसद्विवेको
दुर्लभः मुमुक्षुत्वेन ततो दुर्लभं वैराग्यं ततो दुर्लभं शमादि संपत्तिस्ततो दुर्लभः सन्यासस्ततोऽपि दुर्लभः श्रुतेर्ककमतेः श्रवणा
दिस्ततोऽति दुर्लभः मुमुक्षुररसाधारणकारणान्तर्गतज्ञानमपरोक्षमतीवदुर्लभमतरतं न्यूनपरिपाके हेतुः समाधिदुर्लभमतमेः तत्त्वं
धं स्वसिद्धिसाधनस्य प्रमाणप्रबोधेक्यमल [illegible] प्रापकत्वा परिणामेऽमृतोपमं

सुखस्यैवात्मस्वरूपत्वे सुखमस्त्वात्मेति प्रमत्तस्य प्रमाणं आत्मा सुखस्वरूपः सुषुप्तौ सुखमात्रोपलंभात्समाधिव
द्विन्नानुमानं च सच्चिदानंदमात्रमेकरसं ब्रह्म सुखस्वरूप आत्मा स्वरूपेणोपविष्ट आनंदघन इति श्रुतिश्च मुमुक्षुप्रवृ
त्त्यन्यथानुपपत्तिप्रसक्तार्थापत्तिरपि च प्रमाणं न हि दुःखैकस्वरूपमिति वेदनात्मन एव स्वरूपमिति क्रमः अत एव त
ज्जडदुःखात्मकत्वमनात्मनः सर्वप्रसिद्धं अतोऽन्यदार्तमिति नाल्पे सुखमस्तीति तदेतज्जडमोहात्मकं अतो वस्तु
च्छिन्नमित्यादिश्रुतिप्रसिद्धेश्च ननु दुःखस्यानात्मस्वरूपत्वे सिद्धे विषयसुखमिति व्यपदेशः कथमिति चेदुच्यते पु
ण्यकर्मवशात्सुरूपस्येष्टपदार्थसान्निध्ये सत्यंतःकरणे सत्वमाविर्भवति तत्र आनंदस्वरूप आत्मा प्रतिबिंबति प्रतिबिं
बात्मानंदस्फूर्तिरेव विषयसान्निध्याद्विषयसुखमित्युच्यते पुण्यपतारतम्यात्सत्वतारतम्यं सत्वतारतम्यात्प्रतिबिंब
स्फूर्तेश्चतारतम्यं तेन सुखस्यापि तरतमभावस्तत एव श्रूयते एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति ततो
विषयसुखमाभासिकं महांतो ब्रह्मविदो नापेक्षंते पूर्णानंदामृतरसपायिनः नन्वात्मनः आनंदरूपत्वात्परिपूर्णा
त्वाच्च सदा सर्वत्र सर्वेषामपरोक्षतः सुखानुभूतिः स्यादेव स्यादिति चेन्न वृत्तिबुद्धिमायेसत्वादात्मस्वरूपोपलब्धेरा

28

काचंद्रेन चंद्रिकायाः परिपूर्णत्वेपि नष्टदर्शनाल्हादस्य सुसौष्ठवमपेक्षते तद्वदात्मानंदानुभूतिरपि बुद्धिप्रसादम
पेक्षते तत एवोच्यते भगवता आत्मबुद्धिप्रसादजमिति एवमात्मबुद्धिप्रसादजं नित्यं निरंतरं निरपेक्षं निरतिशयं निरव एम०
धिकं यद्वाह्यं सुखं तत्सात्विकं सत्वाविर्भूत्या आविर्भूतत्वात्सात्विकमिति महर्षयो वदंतीत्यर्थः राजसं सुखमाह ३७ १७
विषयेंद्रियसंयोगात्यत्तदग्रेऽमृतोपमं परिणामे विषमिव तत्सुखं राजसं स्मृतं ३८ विषयेंद्रियसंयोगाद्विषयाणां

संगान्नाहमिति विषयासिद्धेश्च न द्वितीयः विषयव्यवधाने सुखादर्शनाच्चापि तृतीयः सुखस्य पुण्यकर्मकार्यत्वेन तद्धर्मता
नुपपत्तेः नयाने धर्म्मेप्युत्पन्नस्य सुखस्यैव सुखोदयप्रसंगान्न चतुर्थः भोक्तृस्मृदाविषेपदर्शनाच्चापि पंचमः सुखार्थिनः
स्वर्गगमनाभावप्रसंगात्स्वर्गस्यानामपि दुःखश्रवणाच्चनापि षष्ठः सांतानपवर्गसिद्धेविरक्तस्य संगाच्चाप्यत्तान धर्मः वस्तुतो
योऽयत्वात्ताने सुखादर्शनाच्चापि ज्ञानधर्मः वस्तुरस्यत्वज्ञानेपि विरक्तस्य सुखानुदयात्सुखकरणव्यापाराभावस्वरूपं नभ
वतिस्वप्ने सुखादर्शनात्करणव्यापारवति भोजनादौ सुखदर्शनाच्चनापि च दुःखाभावस्य रूपं दुःखाभाववति मूर्छितेषु सुख
दर्शनादिवेतनत्वान्न तदभिव्यञ्जनाभाव इति चेन्न दुःखाभाववत्सांतुष्यस्वतोऽसुखादर्शनाद्दुःखं स्पृष्टं नेमेन दुःखाभावः
सुखमिति न च सुखस्याभावत्वेनाभावरूपत्वानुपपत्तेः नैवैतेन यशुवत्सेन सौषुप्तिकं सुखमनुभूतं नित्यविषय मनस्त्वो ते दुः
खाभावः सुखमिति नहि सुखमात्मन एव धर्म इति चेन्न सुखमात्मनः स्वरूपं न तु धर्मः धर्मत्वे धर्मनाशादात्मनोपि नाशप्र
संगात् ननु स्वरूपत्वेपि सुखस्य क्षणिकत्वात्स्वरूपस्य तत्सुखनाशेनात्मनोपि नश्वरत्वमिति चेन्न आकाशवत्स्वरूपत
स्तु नित्य इत्यात्मनो नित्यत्वश्रवणान्न स्वरूपभूतसुखस्यापि नित्यत्वसिद्धेः ननु सुखं यथात्मनः स्वरूपं तथा दुःखम
प्यात्मन एव स्वरूपं भवतु सुख्यहं दुःख्यहमिति सुखदुःखसमानप्रयोगविषयत्वदर्शनादिति चेन्न सत्तो समीतिवत् दुः
ख्यहमिति मनुष्यः संमोहकार्यत्वेन मिथ्यात्वोपपत्तेः नहि पुत्रेऽस्तेऽस्तो हमस्मीतिवत्तुमेरणमतिमोहादारोपणं
विना तद्दुःख्यहमिति दुःखित्वमात्मनः स्यादिति मोहादारोपितत्वान्मिथ्यात्वमेव दुःखस्यात्मनः स्वरूपत्वे सुषु
प्तावनुपलम्भेन सुखमस्वास्वममिति सुखोपलब्धिवद्दुःखोपलम्भाभावात् दुःखमात्मनः स्वरूपं न भवति सुखमेवात्मस्वरूपं

दु.५

रूपं कर्तव्यमिति वैदिकानां कर्मणां सर्वेषां कर्तव्यतायां प्राप्तायां ब्राह्मणादीनां मुमुक्षूणां येषां येषां स्वस्वगुणानुरू
पेण यानि यानि कर्माणि विभक्तानि भवन्ति तैस्तैस्तानि तान्येव कर्तव्यानि नान्वितराणीति नियमं दर्शयति
४० ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप । कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ४१ ब्राह्मणा
श्च क्षत्रियाश्च विशश्च तेषां ब्राह्मणक्षत्रियविशां द्विजत्वजात्याविशेषसमत्वेप्युपनयनाध्ययनयजनादिकर्म
णि शमेण च समत्वाद्धर्मतः समानानां समानकरणमविरुद्धं शूद्राणां चेति पृथक्करणं जात्याधर्मेण
क्रियया च विषमत्वाच्चविरुद्धमेव तेषां ब्राह्मणादीनां शूद्राणां च नियमेन कर्तव्यानि कर्माणि स्वभाव
प्रभवैः स्वभावः प्रकृतिस्तत्प्रभवैः गुणैः सत्वादिभिः प्रविभक्तानि प्रकर्षेण विभक्तानि गुणवतां गुणभेदे
न कर्माण्यपि भिन्नानि गुणैः संकीर्णत्वेन व्यवस्थापितानि भवन्तीत्यर्थः यद्वा स्वभावप्रभवैः ब्राह्मणस्व
भावः केवलसत्वगुणप्रभवः क्षत्रियस्वभावः सत्वमिश्रितरजः प्रभवः वैश्यस्वभावः रजोमिश्रिततमः
प्रभवः शूद्रस्वभावः केवलतमः प्रभवः एवं सत्वादिगुणभेदेन तत्तद्गुणवतां ब्राह्मणादीनां शूद्राणां

च कर्तव्यानि कर्माण्यपि भिद्यन्त इत्यर्थः यद्वा प्राणिनः स्वमुखमासीदित्यादि श्रुत्युक्तप्रकारेण चत्वारो वर्णाः
ब्राह्मणक्षत्रियवैश्यशूद्रास्तेषां पूर्वपूर्वजन्मतः श्रेयानिति न्यायेन प्रभवः एवं भावो जननं स्वकीयो भावः
स्वभावः यद्वा स्वेषां भावः स्वभावः मुखबाहूरुपादेभ्यो जननं प्रभवः कारणं येषां तैः स्वभावप्रभवैः स्वजन्म
निमित्तकैः गुणैः उत्तममध्यमनिकृष्टत्वादिनिकृष्टत्वेनोपलक्षितानां ब्राह्मणक्षत्रियवैश्यशूद्राणां

मिन्द्रियाणां च संसर्गाज्जायमानं यद्वैषयिकं सुखमग्रे एवं स्वानुभूतिकाले स्वानुभवेन पुरुषस्यामृतोपमं सुधा
कल्पं संसर्गयोग्यो विवर्धत इति न्यायेन स्वविषयकारिणे वा विपाकानक मोहि प्रवर्धयति परिणामे तत्कार्यफलकाले त्वा
नुभवे पुरुषं विषमिव हन्ति स्वकार्येण योजयित्वा कामभिजायते तेन चेति न्यायेन नानायोनिषु यातयित्वा मुहुर्मुहुः मर्दयतु
गमयतीत्यर्थः यदेवंलक्षणं वैषयिकं सुखं तद्राजसं रजोगुणेन कामेन संभावितत्वाद्राजसमिति मुनिभिः स्म
तमुक्तमित्यर्थः तामसं सुखमाह ३८ यदग्रे चानुबन्धे च सुखं मोहनमात्मनः निद्रालस्यप्रमादोत्थं तत्तामसमु
दाहृतं ३९ अग्रे स्वोत्पत्तिकाले चानुबन्धे च परिणामकाले च यात्मनः सदसद्विवेकहेतोर्बुद्धेर्मोहनं मोहक
रं विवेकशक्तितिरोधायकं निद्रालस्यप्रमादोत्थं निद्रा प्रसिद्धा आलस्यं बुद्धिजाड्यं प्रमादो बुद्धिपारवश्यमेतेभ्य
स्समुत्पन्नं यत्सुखं तत्तामसं तमोगुणनिष्पन्नत्वात्तामसमिति ऋषिभिरुदाहृतमित्यर्थः क्रियाकारकफलानां वि
भज्य त्रिगुणात्मकत्वं प्रतिपाद्य अविभागेन सर्वं त्रिगुणात्मकमेवेत्याह ३९ न तदस्ति पृथिव्यां वा दिवि देवेषु वा
पुनः सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४० पृथिव्यां भूलोके वा शब्दान्तराले दिवि स्वर्गे वा देवेषु ब्रह्मा
दिषु वा पुनः शब्दो वार्थः प्रकृतिजैः प्रकृतिसमुत्पन्नैरेभिः पूर्वोक्तलक्षणैस्त्रिविधैर्गुणैः सत्त्वादिभिर्मुक्तं परित्यक्तं श्रे
ष्ठं यत्स्यात् घटत्वेन सत्त्वं द्रव्यमात्रं वा त्रिलोकानामपि त्रिगुणात्मकमायाकार्यत्वात् जगत्सर्वमपि त्रिगुणात्म
कमेवेत्यर्थः ॥ एवं सर्वस्यापि जगतो गुणत्रयात्मकत्वे सिद्धे गुणत्रयातिक्रमणं कृतवत एव मुक्तिरिति गुणान
त्येनुमिच्छो मुमुक्षोस्तदतिक्रमसिद्धेः परमकारणं ज्ञानं तत्सिद्धेः कारणं सत्त्वशुद्धिस्तत्कारणं नुकर्मैव न देवाद

गी०

गी०अ०टी०
२८

मितिमद्विवृतंभवति ततोमोक्षस्यसम्यक्कृतं ब्राह्मणजन्मनामवक्षिः पंडितैः क्षिप्रंमोक्षायप्रयतितव्यमिति सिद्धं ४२ ॥
वं ब्राह्मणकर्मोक्त्वा क्षात्रं कर्माह शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं दानमीश्वरभावश्च क्षात्रं कर्म स्वभाव
जं ४३ शूरस्य भावः शौर्यं पराक्रमः शौर्यागमापि सिंहत्वरणसामर्थ्यं तेजः प्रागल्भ्यं बलवत्तामपि दुर्धर्षत्वं धृ
तिर्विपदि चित्तस्यावैकल्यरादिक्षुधैर्यं दाक्ष्यं दक्षस्य भावो दाक्ष्यं प्राप्तिकृत्यस्य तेपि स्वकार्यनिर्वाहसामर्थ्यं च यु
द्धे त पलायनं मारणे व्यपराङ्मुखत्वं दानं पात्रेभ्यो वित्तसमर्पणं ईश्वरभावः ऐश्वर्यं प्रभावातिशयेन सर्वेनि
यंतृत्वं धर्मेण प्रजापरिपालनमित्यर्थः चकारोपि श्रौतस्मार्तसमुच्चयार्थः शौर्यादिरूपं यत्तं सर्वं कर्म स्वभावजं
सत्वमिश्ररजःप्रकृतितो बाहोरुत्पत्तितो वा प्राप्तं क्षात्रं क्षत्रियजातेः कर्तव्यं शास्त्रेण विहितमित्यर्थः ४३
वैश्यशूद्रयोः कर्माह कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजं परिचर्यात्मकं कर्म शूद्रस्यापि स्वभाव
जं ४४ कृषिः कर्षणं वितलेखनं गौरक्ष्यं गाः रक्षतीति गोरक्षः तस्य भावो गौरक्ष्यं पशुपालनं वाणिज्यं व
णिजः कर्म वाणिज्यं क्रयविक्रयलक्षणमेतत्त्रिविधं कर्म स्वभावजं रजोमिश्रतमःप्रकृतितः ऊरुतः सकाशात्तो वा
प्राप्तं वैश्यविशेषजातेः कर्तव्यं शास्त्रेण विहितमित्यर्थः परिचर्यात्मकं सेवात्मकं त्रैवर्णिकानां शुश्रूषालक्षणं स्वभा
वजं केवलतमःप्रकृतितः पद्भ्यां जन्मतो वा प्राप्तं शूद्रस्य कर्तव्यं कर्म शुश्रूषा शूद्रस्येति शास्त्रेणोक्तमित्यर्थः न
नु ब्राह्मणक्षत्रियविशां नियमेन कर्तव्यानि कर्माणि वक्ष्यामीत्युपक्रम्य शमो दम इति शौर्यं तेज इति प्रा
कृत एव धर्म उपदिश्यते ननु वैदिकं कर्म नियमेन कर्तव्यं ये न कृतेन श्वर्गः प्राणातिनहिंसे शौर्यं कृष्यादि कर्मणा

नियमेन कर्त्तव्यानि यानि कर्माणि तानि जन्मान्तरकृतसुकृतादिभेदेन विभक्तानि शास्त्रेण विभज्य विहितानीत्य
र्थः ४१ तेषां जातिनियमेन विभक्तानि कर्माणि कानीत्यत आह शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ज्ञानं विज्ञा
नमास्तिक्यं ब्रह्मकर्म स्वभावजं ४२ शमश्चित्तोपरमः दृष्टादृष्टविषये सर्वत्र निःशेषभोगाशानिवृत्तिः दम इंद्रियाणा
मुपरमः कर्तव्यार्थेषु प्रवृत्तिः तपः सप्तदशप्रोक्तं शारीरादि त्रिविधं तपः शौचं बाह्यमाभ्यंतरं च शुद्धिः अत्र तत्र सपरान्न
स्य च त्यागेन वक्त्रस्य जिह्वायाश्च शुद्धिः परिग्रहत्यागेन पाणिशुद्धिः विहितब्रह्मचर्येण कच्छशुद्धिः रागद्वेषादिदो
षत्यागेन मनःशुद्धिः विहिताचरणेन क्रियाशुद्धिरिति षोढा शौचं क्षान्तिः क्षमा निंदाक्रोशताडनादिभिरुत्पाद्य
पि चित्तविकारानुदयः आर्जवं सर्वदा करणत्रयस्यैकरूपत्वं ज्ञानं सम्यगधीतवेदशास्त्राणां पदवाक्यार्थज्ञानं वि
ज्ञानं तदनुष्ठानानुभवजन्यसमर्थं निरंकुशं शास्त्रार्थे नैतन्निश्चयः आस्तिक्यमस्तित्वमिदमेव वर्णकर्तव्यमनेन मन्ये
ष्टं प्राप्नोतीति कर्मणि कर्मफले च श्रद्धा चकारोऽनुक्तयोरध्यायवेदेश्वरे श्रद्धान्तयोः समुच्चयार्थः एवका
रस्तदेव ब्राह्मणस्य मुमुक्षोः कर्तव्यं कर्मेत्यवधारणार्थः स्वभावजं केवलसत्त्वप्रकृतिना मुख्योत्पत्ति
तो वा शास्त्रं ब्राह्मणब्राह्मणजातेरर्हं कर्तव्यं कर्मेदं शास्त्रेण विहितमित्यर्थः यद्यपि त्रैवर्णिकानां मुमुक्ष
णां सर्वेषां शमाद्यास्तिक्यान्तं कर्म मोक्षसाधनत्वेन सममेव भवन्ति तथापि केवलसत्त्वप्रभवानां ब्राह्मणा
नां गुरुस्वभावधुर्यवत्सहजं कर्म स्वाभाविकं नियतं च भवति न तथेतरेषां नुपलसाध्यमिति बोधयितुं ब्रह्मक
र्मेत्युक्तं तेन ब्राह्मणानामेव

गी० प० ना०
२०

उपलक्षितानि यज्ञदानतपःकर्माणि न त्याज्यं कार्यमेव तदिति श्रौतानि स्मार्तानि चोपदिश्य सत्वशुद्धेस्तेषां मोक्षपर्यन्तं बुध्याकृते
स्यत्वं बोधयितुं प्रकृते सिद्धये फलं प्रदर्शयति स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः स्वकर्मनिरतः सिद्धिं यथा विंदति तत्
छृणु ॥ ४५ ॥ नरो ब्राह्मणादिर्मुमुक्षुरधिकारी स्वे स्वे शमो दमस्तपादिना विभज्य प्रदर्शिते स्वकीये कर्मणि शमा
दौ श्रौते स्मार्ते चाभिरतो नियमेन परिनिष्ठितः यथाविधि समनुष्ठितः सन् कर्मसंक्षालितमतोपसर्वपापमलः सन् सं
सिद्धिं सत्वशुद्धिं सकृदुपदेशमात्रेणात्मतत्वावगत्याविर्भावयोग्यतालक्षणां विंदते ननु बहुभिर्ब्राह्मणादिभिः स्वे
कर्मणि क्रियमाणे न तेषां तत्कर्मानुष्ठानेन सत्वशुद्धिरुक्तलक्षणा दृश्यते कथं कर्मण्यभिरतः सत्वशुद्धिं लभत इत्याकांक्षा
यां यो वा एतदक्षरं गार्ग्यविदित्वास्मिंल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यंतवदेवास्य तद्भवतीति न्या
येन सर्वोक्तशमाद्यभावेन कामसंकल्पाहंकाराभिनिवेशेन च कर्माण्यनुतिष्ठतः सत्वशुद्धिर्न सिध्यतीति बोधयितुमा
ह स्वकर्मेति मुमुक्षुर्ब्राह्मणादिरुक्तशमदमादिसंपन्नः स्वकर्मनिरतः स्वस्य श्रुतिस्मृतिभ्यां विहिते वैदिके कर्म
णि निरतो निष्ठितः सिद्धिं सत्वशुद्धिं यथा येन प्रकारेण विंदति तं तं प्रकारं शृणु श्रुत्वा न यथानुष्ठाने मतिं कुर्वित्यर्थः ब्र
ह्मार्पणं ब्रह्म हविरिति कर्त्रादिक्रियाणां संप्रयुज्यते क्रतुः सर्वं च तत्कर्मफलं चेत स्वर्गादि तत्साधनमप्यशेषं हरे
र्न किंचिद्व्यतिरिक्तमस्तीत्येतच्छ्रुतिस्मृतियुक्तिरीत्या मुख्याधिकारिणो विदुषः कर्तृकर्मतत्साधनस्तु कर्तृत्वं च स्व
तो द्राशाम्यादि शुद्धब्रह्मदृष्ट्याभ्याहृतया कर्माण्यनुतिष्ठतः इष्टानिष्टत्वमित्रामित्रत्वदुष्टादुष्टत्वादिविषमबुद्धिः
कर्मणा विनश्यति तत्राप्यज्ञानाद्रागद्वेषादिदोषान् स्पंति तत्राशादहंममेत्साभिमानादिदोषान्स्पंति तेषां रजस्तमोदो

21

स

अनुष्ठितेनेश्वरः प्रीणातीति कथमिदं विपरीतं कर्मोपदिश्यत इति चेत्सत्यं शमादिकं शौर्यादिकं च कर्म संध्यादिवदनुष्ठे
यं न भवति नापीदमीश्वरप्रीतये च भवति तथापि विशेषोऽस्ति उच्यते अहरहः संध्यामुपासीत सायं प्रातरग्निहोत्रं जुहो
ति यजेताध्ययनं दानमिति द्विजातीनामध्ययनमिज्या दानमिति ब्राह्मणादीनां नियमेन नित्यं कर्मत्वं कर्मणो यथा शास्त्रे रा
ने वोक्तं नैवं शमादीनां तासि विभावयति दमेन दान्ताः किल्बिषमवधून्वन्ति तपसा किल्बिषं हन्तीति रागोऽधिकं रक्षणे सर्व
भूतानामाप्यदेऽत्वं विभज्यान्संग्रामेन शान्तानियम ... दमेन दान्ताः किल्बिषमवधून्वन्ति तपसा किल्बिषं हं
तीति रागोऽधिकं रक्षणे सर्वभूतानामाप्यदेऽत्वं विभज्यान्संग्रामे संस्थानमनिवृत्तिश्चेति कृषिवाणिज्ये च स्वयंकृ
ते कुसीदं चेति मनुः शूद्रस्तु धर्मो वर्ण एकजातिः तस्यापि समञ्जौकः परिचर्या चैतेरेवामित्येतान्यपि कर्माण्यनुष्ठेयत्वेन
शास्त्रे शौचोक्तानि भवन्ति किंतु परमत्र विशेषः ब्राह्मणादीनां संध्योपासनाग्निहोत्रादिरविभक्तो वर्णाश्रमधर्मः शम
शौर्यकृष्यादिस्तु प्रत्येकं विभक्तो जातिधर्मस्ततो जातिवर्णाश्रमनिमित्तको द्वाविमौ धर्मौ नित्यौ श्रौतस्मार्तेकव
त्यधानादेव भवतो न तु न परेङ्गाङ्गिभावः सिध्यन्तु भावपि शास्त्रेणानियतत्वात् मुमुक्षूणां नियमेनानुष्ठानत्वादेवं ने
वात्र किंचिद्विपरीतमस्ति गहितं तु बोधयितुं वा ततो जातिधर्मो नियमेनैवं नेमानैः ब्राह्मणादिभिः स्वस्ववर्णाश्रमार्हं कर्म वै
दिकं नित्यमनुष्ठातव्यं नान्यथा कर्मणां प्रधानस्यैकदेशानुष्ठानेन साकल्यासंभवात्फलं सिध्यति न हि श्रौतस्मार्तयो
रन्यतरानुष्ठानेन समस्कारसाकल्यं सिध्यतीत्यतस्तेन स्वधर्मे शमादौ शौर्यादौ सदा वर्तमानैरेव ब्राह्मणक्षत्रियादिभिः
संध्याग्निहोत्रादिनित्यं कर्म नियमेन कर्तव्यमिति सिद्धं ४० एवं ब्राह्मणादीनां नियमेन कर्तव्यानि शमादीनि कर्माणि

नद्रव्येणाक्षिप्यमाणराजसूयादियागाद्यनुष्ठानापेक्षया मुक्तिकामस्य क्षत्रियस्य प्रतिग्रहभीरुब्राह्मणवत् मुक्त्वेत्यस्य अवस्था

नमेव श्रेयःसाधकं निर्व्यापारं भवतीत्याशंक्याह ४६ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् स्वभावनियतं कर्म

कुर्वन्नाप्नोति किल्बिषं ४७ परधर्मात्स्वजात्याश्रमवर्णेन वाऽश्रमेण वा तस्माद्भिन्नः स्वविलक्षणात्स्वधर्मात् सदाचा
रात्स्वनुष्ठितात् अंगलोपराहित्येन सम्यगाचरितात् परस्य ब्रह्मचारिणो वानप्रस्थस्य वा धर्मात् विगुणोपि स्वलक्षणयोग्य
त्यहीनोपि दोषवानपि ब्राह्मणस्य क्षत्रियस्य वान्यस्य वा स्वधर्म एव श्रेयान् प्रशस्यो निःश्रेयसस्य साधनं भवति न तु स
म्यगनुष्ठितोपि परधर्मस्तस्याविहितत्वादित्यर्थः न देवविस्पष्टयति स्वभावेति ब्राह्मणस्याधिकारः अध्ययनयाजन
प्रतिग्रहाः न दोषो हिंसायामाहवे इत्येवं स्वभावनियतं स्वभावस्तज्जातिस्तदुद्दिश्य नियतं शास्त्रेण विहितं क
र्म प्रतिग्रहं तदुपार्जितद्रव्येण यागाद्यनुष्ठानं च ब्राह्मणः युद्धादिलक्षणं कर्म तदुपार्जितद्रव्येण यागाद्यनुष्ठा
नं क्षत्रियः कुर्वन् किल्बिषं चित्तशुद्धिप्रतिबंधकं नाप्नोति स्वजातेः स्ववर्णस्य स्वाश्रमस्य विहितधर्मानुष्ठानेन पुरु
षः पापी न भवतीत्यर्थः ४७ ब्राह्मणस्य क्षत्रियस्य वा स्वधर्मस्याग्निष्टोमादेः पङ्कस्य च वहिर्दोषवत्त्वोपमानेपि

विध्युक्तत्वेन निर्दुष्टत्वात्तदनुष्ठातुः मुक्तपत्य भवति न तु बंधायेति बोधयित्वा परपि यागो वा संग्रामो हिंसाप्रधानत्वे
न दोषवानेव भवतीति कथं कर्तुं शक्यत इत्याशंकां सर्वथापि न कर्तव्योस्तु कर्म एवार्थं दृष्टपि तुमाह सहजं कर्म कौंतेय स
दोषमपि न त्यजेत् सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः ४८ सहजं कर्मणा जायते हि जइति न्यायेन सह जन्मना
द्वितीयेन जायत इति सहजं जातितः प्राप्तं जातिं वर्णं चानिमित्तीकृत्य शास्त्रेण विहितं कर्म स्वधर्ममित्यर्थः सदोष
मप्युक्तरीत्या दोषयुक्तमप्याहरहः सुमोक्षेच्छुब्राह्मणादिर्न त्यजेन्न संन्यसेदित्यर्थः ननु दोषवत्कर्मणोऽनुष्ठानात्

राम०

षाणां सर्वेषां कर्मणां निःश्रेयसविनाशेन स्वरूपमेव प्रसीदतीति बोधयितुं सर्वेऽस्य स्वगुणाद्ब्रह्मात्मत्वं तावत् एतान्वतः पंक्ति
नस्यमध्यानदाराधनमेव कुर्वतः सत्त्वशुद्धिः सिध्यतीत्याह ४५ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्यर्च्य सि
द्धिं विंदति मानवः ४६ जन्माद्यस्य यतः यतो वा इमानि भूतानि जायंते इत्युक्तप्रकारेण यतो यस्मान्मायोपाधिकात् ब्रह्म
णः सकाशाद्भूतानामाकाशादीनां तत्कार्याणां च प्रवृत्तिरुत्पत्तिः सत्स्वकाशात् घटादिवत् यस्मादिदं सर्वं समुत्पन्न
मित्यर्थः किं च येन कारणभूतेन ब्रह्मणा तत्कार्यमिदं जगत्सर्वं ततं व्याप्तं मृदा घटवत् हिरण्येन स्वर्णं भवति तं सर्वात्मकं
परमात्मानं स्रुक्स्रुवाग्निहोत्रमंत्रतंत्रादिषु सर्वत्र ब्रह्मदृष्टिर्भूत्वा मानवोऽधिकारी विद्वान् स्वकर्मणा श्रौतस्मार्तोदिना
सात्त्विकेनाभ्यर्च्य श्रद्धाभक्तिभ्यां नियमेन पूजां सर्वत्र ब्रह्मदृष्टिं च कृत्वा सिद्धिं सत्त्वशुद्धिलक्षणां विंदति सत्त्वशुद्धिं तत्फलभू
तां ज्ञानसिद्धिं च प्राप्नोतीत्यर्थः यतः प्रवृत्तिर्येन सर्वमिति विशेषणद्वयं सर्वत्र ब्रह्मदृष्टिकर्तव्यतायां धनार्थमेवेन सर्वेणाप्यत्रा
धिकारिणां मध्यमादिभेदेनु यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योंऽतरः इत्यादिश्रुत्यनुसारी न्यायतोऽयस्माद्भूतानां ब्र
ह्मादिस्तंबांतानां प्रवृत्तिः श्रेष्ठा सिध्यति यः सर्वं प्रवर्तयतीत्यर्थः सर्वं जगदिदं येन ततं व्याप्तं यः सर्वात्मक इत्यर्थः तम
ग्नींद्रादिदेवतारूपेण वर्तमानं सर्वनियंतारं परमेश्वरं स्वकर्मणाभ्यर्च्य श्रद्धाभक्तिभ्यामग्न्यादिदेवान्सर्वान्परमेश्वर
बुध्या पूजयन्स तदनुग्रहेण मानवो मुमुक्षुरधिकारी ब्राह्मणादिः सिद्धिं सत्त्वशुद्धिं सत्त्वशुद्धिं तत्फलभूतां ज्ञानसिद्धिं च
क्रमेण विंदतीत्यर्थः ननु ब्राह्मणस्य यजनयाजनादिनिमित्तमाचार्यो यज्ञो विवाहश्चेति मुमुक्षोश्चित्तशुद्धिं तत्फलं चानुपलब्ध
नोपपत्तादेः प्रतिग्रह इत्येकसाध्यत्वात्प्रतिग्रहस्यैव पापहेतुत्वात् प्रतिग्रहानद्रव्येण क्रियमाणयागादेः पापप्रयोजकत्वाद्ब्रह्म
चारिवद्वृत्तिनियमः स्तु हृदन्याऽवस्थान... स्वधानत्वान्... ध्ये

ज्ञात्मा ब्राह्मणादिमुनिभिः साक्षाद्विनयाचरस्य तिः वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिं
गी०अ०१८ इति पतन एवं वर्णाश्रमिणां मुमुक्षूणां बंधमुक्तये स्वधर्म एव कर्तव्य इति सिद्धं। ज्ञानकर्मणोः साध्यसाधनभावं सर्वं प्राप्तं
२२ प्रसिद्धं बोधयितुमेवमाह स्वोमेक्षैककामस्य कर्तव्यस्य कर्मणो दोषवत्त्वेपि चित्तशुद्धेरन्यासाधनत्वेनावश्यकरणीयत्वं श्रु
तिस्मृतिभ्यां विहितत्वेन निर्दुष्टत्वं श्रेयःसाधनत्वं तेन सात्त्विकेन कर्मणा बहुजन्मभिः समाराधितपरमेश्वरप्रसादाच्चि
त्तशुद्धिं च प्रतिपाद्य सात्त्विकेन वक्ष्यमाणसात्त्विकेन च कर्मणा समाराधितपरमेश्वरप्रसादात्सम्यक्सत्त्वशुद्धिं प्राप्तः सद्गुरो
स्सकृदुपदेशमात्रेण संप्राप्तात्मतत्त्वनिश्चयः संन्यासयोगेन ब्रह्मप्राप्तिं निर्दिशति ४८ असक्तबुद्धिः सर्वत्र जिता
त्मा विगतस्पृहः नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ४९ असक्तेति बुद्धिः सर्वत्र विषयांतरे कर्मांतरे देशांतरे लोकांतरे दे
श्लो० वतांतरे च भोक्तृत्वस्यानुमानानुपात्मनि तु वा सक्तां नत्वरज्ञानतं द्विषये संबंधरहिता बुद्धिर्यस्य सोऽसक्तबुद्धिः सर्वद्दृश्यमिथ्या
त्वं निश्चित्य सर्वत्र विषयमात्रे सम्यग्विरक्त इत्यर्थः सर्वं मिथ्यात्वनिश्चयेन विषयाननुषक्तबुद्धित्वेपि चलचित्तस्य ज्ञाननिष्ठासं
भवाद्धि दुष्पोवश्यात्मत्वेन भवितव्यमित्याह जितात्मेति जितस्तीव्रवैराग्येणाभ्यासदीर्घकालिकनित्यनिरंतरसत्का
23 पावृत्तन्यासेन निर्जितो ब्रह्मरूपेण स्थिरतां गमित आत्मा मनो यस्य स जितात्मा वशीकृतचित्त इत्यर्थः असक्तबुद्धित्वे जिता
त्मत्वेपि च सिद्धे शरीरसौख्यापेक्षावतः परिग्रहवतश्च योगिनो ज्ञाननिष्ठा न सिध्यति तद्राहित्येन भवितव्यमित्याह। विगतस्
पृह इति देहात्परिग्रहाच्च विशिष्यगता विगता देहपरिग्रहसेव्यविषयास्पृहा यस्मात् स विगतस्पृहः काले प्रारब्धप्रापितान्
गी०म० नभोजी कौपीनकं थां दंडं कुंडिकामात्रधारी च भवेदित्यर्थः एवमुक्तसाधनसंपन्नः सम्यग्विदित्वा तत्त्वा ब्रह्ममुमुक्षुरा
२२ हृदुस्वन्यासेनत्सनिब्रह्मलोकस्वात्मना विदितेन नित्यमासः संन्यासः समाधिः निरंतरब्रह्मनिष्ठा तेन संन्यासेन निरंतरज्ञाननि

दुष्टस्य परधर्मस्याश्रयणं प्रसक्तमेवेति चेद्वा नच्च महद्भिः कर्तव्यस्य कर्मणस्त्यागः दुष्टत्वबुध्या वा किमसाधनत्वबुध्या वा
किमसत्वबुध्या वा परधर्मत्वबुद्ध्या सन्न्यासश्च परगीयते इति वा नाद्यः विहितस्य परित्यागे प्रत्यवायप्रसंगान्न द्वितीयः श्र
विरक्तस्यासाधनत्वबुध्यानुत्पत्तेः विरक्तस्य तत्कर्मणा शुद्धसत्वो गुरुनदो यविद्यायाः संभवात् न तृतीयः अनात्मज्ञस्य कर्मणस्त्वसाधनफ
लेच्छः सत्वबुध्यानुत्पत्तेः नापि चतुर्थः परधर्मस्यापि कर्मत्वेन दोषवत्त्वात् अभिचारादिनिकृष्टकर्मणां विरक्तस्याप्रसक्तौ
पवीतादिमत्त्वेन कर्मलिंगान्तर्भावेन कर्मणो विसाधनत्वेन दोषवत्त्वमेव निवृत्तिमत्सर्वैर्वर्णाश्रमिभिः क्रियमाणं कर्म दोषवदेव न
हिंस्यात्सर्वभूतानीति श्रुत्या च न हिंसाया निषिद्धत्वात्सर्वस्यापि कर्मणो वैदिकस्य कुसुमसमिधादिद्रव्यसाध्यत्वेन हिंसाप्र
धानत्वात्सर्वैर्वर्णाश्रमिभिः क्रियमाणं कर्म सर्वमपि हिंसाप्रधानत्वेन दोषयुक्तमेव भवतीति सर्वस्यापि कर्मणो दोष
वत्त्वदर्शिनि मुमुक्षौ सर्वारंभाहीनिष्पृहः कामसमयपुण्यपापयुक्तपुरुष इति पर्यालोच्य कृतेऽपि तु तत्काम्यस्य चेष्टितमिति रजोगु
णात्मकं विहितस्य संगसमुद्भवं नैष्कर्म्यं आनिको नैष्कर्म्यसंगेन देहिनमिति न्यायेन कर्मणः सर्वस्यापि कामसंक
ल्पादिहेतोर्गुणकार्यत्वे दोषवत्त्वात्सर्वोऽपि कर्मारंभो दोषवत्त्वे उच्यते सर्वेति हि यस्मात्कारणात्सर्वारंभा आरभ्य
न्ते क्रियन्त इत्यारंभाः सर्ववर्णाश्रमिभिः क्रियमाणानि कर्माणि सर्वाण्यपि हिंसादोषेण रजोदोषेण वावृताः यथाग्निः धू
मेनाग्निरिव यथा त्रयः स्वोत्पन्नो धूमेन विना भावाभावस्तथा वैदिकस्य कर्मणोऽपि हिंसया कामेन वा विनाभावाभावा
त्सर्वमपि कर्म दोषवदेव यस्मादेवं तस्मात्परधर्मोऽपि दोषवानेव भवति परधर्माचरणे तु अस्वाभाविक एको दोषः स्वधर्म
त्यागकृतो द्वितीयश्च विहिताचरणाकरणे तृतीयः ईश्वराज्ञोल्लंघनं चतुर्थं स्यापनतिनस्मादारुरुक्षोर्विरक्तस्य मोक्षैककां
मस्य जातिवर्णाश्रमं च निमित्तीकृत्य श्रुतिस्मृतिभ्यां विहितं कर्म सदोषमपि सत् शुद्धये एव स्वयं कर्तव्यं स्वधर्माचरणेनैव मु

ममतादिदोषनिर्मुक्ता बुद्धिर्यस्य सोऽसक्तबुद्धिः सर्वत्र सर्वस्मिन्विरल इत्यर्थः तात्कालिके वैराग्ये सत्यप्यस्थिरात्मनः पश्चादङ्गनादयो विषयप्रवृत्तिस्तया यानि स्वच्छस्यात्तदभावेन भवितव्यमित्याह जितात्मेति। जितो निर्जितस्तीव्रमुमुक्षया पापपुरुषं मुहुर्विषयसंदर्शनेन तदुदिततीव्रवैराग्येणात्मेव बुद्धिधकत्वबुद्धा भयेन वा सत्यतानेन च सम्यग्विषयवैमुख्यं गमितश्चात्मा मनो यस्य स जितात्मा वशीकृतचित्त इत्यर्थः। तीव्रमोक्षेच्छादिभिः जितात्मत्वे सिद्धेपि क्षेत्रोषधवदर्शनमाचरेद्धि तु कलत्रणाभावे देहसौख्याय स्यावृत्तो ज्ञानतत्फलासंभवात्संन्यासेनाधिकारः तदभावेन भवितव्यमित्याह। विगतस्पृह इति देहसौख्यात्परिग्रहसामाचीन्याद्वि निष्प्रगतास्पृहा आशा यस्य स विगतस्पृहः देहभरणाय स्पारहित इत्यर्थः एवं लक्षणलक्षितः मुमुक्षुरात्मा सहरूपमसादाद्धितानात्मस्वरूपो मुमुक्षुर्विद्वान्नैष्कर्म्यसिद्धिं श्रोतस्मार्तोदिसर्वकर्मभ्यो निर्गतो यः स निष्कर्मा तस्य भावो नैष्कर्म्यं विहितप्रतिषिद्धादिसर्वकर्मसंबंधराहित्येनावस्थानं नैष्कर्म्यं कर्मतद्विध्योरविषयत्वं तस्य प्राप्तिर्नैष्कर्म्यसिद्धिस्तां परमां परमपुरुषार्थस्य मोक्षस्य हेतुभूतत्वात्तान्निष्ठासाधनत्वात्परमां नैष्कर्म्यसिद्धिं संन्यासेन विहितानां कर्मणां तत्साधनानां विधिना परित्यागः संन्यासस्तेन संन्यासाश्रमेणाधिगच्छति प्राप्नोति न तु ब्रह्मचर्याश्रमेणानाधिगाहेस्थ्येन नापि वानप्रस्थेन नैष्कर्म्यसिध्यत्मनो ब्रह्मविदो नैष्कर्म्यं संन्यासेनैव मान्तव्यमिति सिद्धं ज्ञानकर्मणोः स्वाध्यसाधनभावं स्वयमपि तु सात्विककर्मानुष्ठानसंभावितासत्वशुद्धिस्ततस्संन्यासात्मतत्वविवेकज्ञानात् २७ समुपलते विदेहकैवल्यसिद्धिकारणस्य ज्ञानस्याप्रतिबन्धत्वसिद्ध्ये यनियमेन कर्तव्यां तां ज्ञाननिष्ठां सप्रकारां ज्ञानफलं च निरूपयितुमाह ४९ सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे समासे

न्मा१

ष्ठायां यद्ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेत्युक्तलक्षणं ब्रह्मैवाहमिति स्वस्य ब्रह्माकारेणाभिन्नरूपभावापत्तिरूपहित्येनासौ वि
स्थानं येन सिध्यति स संन्यासः सम्यक्ज्ञानमहमेवाधस्तादहमुपरिष्टादहमेवेदं सर्वमित्येवंलक्षणेनानेन संन्यासेन स्वप्राप्यात्मवि
ज्ञानेन नैष्कर्म्यसिद्धिं न यत्र कर्मतत्त्वि निष्कर्मनिष्क्रियं परं ब्रह्म निष्कलं निष्क्रियं शान्तमिति श्रुतेः निष्कर्मणो भावो नैष्कर्म्यं ब्रह्मभाव
स्तस्याप्तिः नैष्कर्म्यसिद्धिः निर्विशेषब्रह्मात्मनावस्थितिलक्षणां तां नैष्कर्म्यसिद्धिं परमां ब्रह्मभावापत्तिरूपतमसिध्यंतराभावा
दनुत्तमां सर्वोत्कृष्टां अणिमादिसिद्धयः सालोक्यादिसिद्धयो वा भेदमत्यपहेतुत्वेन मोहकतया च रूपं संसारपतिनैष्कर्म्य
सिद्धिस्तु सर्वसिद्धिकारणेन सम्यक्दर्शनेन द्वैतन्त्यपहेतुभूताज्ञानध्वांतविध्वंसनं कारयित्वा संसाराद्विनिवर्त्य ब्रह्मावि
दं स्वाराज्यसंमाज्यसुखे संस्थापयत्यतः परमत्वमुक्तं नैष्कर्म्यसिद्धेस्तामेतां नैष्कर्म्यसिद्धिं ब्रह्मविद्यतिः संन्यासेन निरंतरब्र
ह्मनिष्ठासंभावितसम्यग्दर्शनेनैवाधिगच्छति नान्येनेति सिद्धौ नैष्कर्म्यसिद्धिं नैष्कर्म्यं निर्विशेषब्रह्मभावस्तस्याप्तिर्नै
ष्कर्म्यसिद्धिस्तां संन्यासेनाहंकारं बलं दर्पमित्येवं स्वभावलक्षणेनाहमादित्यागेनाधिगच्छतीति यद्वा सर्वकर्मणामनभि
भ्यचैतन्यायेन मुमुक्षोस्सात्विकस्य सात्विकज्ञानादिमिश्रबुद्ध्यादिभिर्युक्तस्य सात्विकेनैव कर्मणा वैदिकेनानेकज
न्मभिः समाराधितपरमेश्वरानुग्रहान्समुत्पन्नसत्वशुद्धेस्ततस्सद्गुरूपदेशमात्रेण संभावितज्ञानतत्त्वविज्ञानस्यैवं
स्थितस्य तु नेह स्वपुत्रैषणायास्त्रेत्युक्तप्रकारेण सर्वकर्मसमाप्तरवाधिकारेण कथंचिदपि कर्मणीति बोधपि
तुमेवंलक्षणस्यैव संन्यासस्योत्पत्त्वमिन्याधिकारिलक्षणानि वदन्नुपरिपक्वान्तःकरणस्य नैष्कर्म्यसिद्धिप्रतिपा
दयति असक्तबुद्धिः गच्छति सर्वत्र पुत्रमित्रकलत्रधनादिषु सक्तसेक्तिर्मोहादनुरक्तिस्तद्रहितत्वादसक्ता एग

पद्दा०

गी०ता०भा०
२४

मः॥ तद्रूपत्वमः परमात्मेत्युदाहृतः॥ मध्यितः॥ तद्रूपोऽनभङ्ग्यं तेन निर्विशेषविशेषणेन ग्रंथेन पादद्वयेनात्मा निर्विशेषो
नित्यशुद्धबुद्धमुक्तस्वभावः परमात्मेत्येकांशोक्तिः॥ परः सम्यङ्निरूपितः तद्विषयं ज्ञानं पादद्वयं पादशज्ञानेनाहमेव देवः बुवे मि
ति ब्रह्मविद्यानिस्वर्वात्मकं दृश्यसंबंधरहितं चिदेकरसमाकाशवत्सर्वगतं अद्वितीयमात्मानं पश्यति नादृशज्ञानमिथ्यै
कार्यापायपरानिष्ठासाधनमकारेण सिध्यतीति तमकारमतो निबोधेत्यर्थः॥ ननु मुमुक्षोरात्मज्ञानमेव न सिध्यति कुतस्तन्नि
ष्ठापरानिष्ठेत्यर्थं ज्ञानस्यासिद्धिरिति चेदुच्यते पदाकारं ज्ञेयं नराकारमेव भवतीति तज्ज्ञानं चेन्नरज्ञेन ज्ञेयरूपतज्ञानं च नरा
कारमेव भवति यथा शुभ्रे न पीताकारं ज्ञानं यथा निराकारसत्तात्मानं ज्ञानं मनस्याकारेत्तिनसत्तामसदुच्यत इति दृश्यत्वनिषे
धान्यदलमहत्त्वलक्षणस्य वस्तुनोऽभिसिद्धत्वादनाकारत्वाच्च विषयत्वानुपपत्तेः आकारवर्जितात्मनः तदाऽसिध्ये
ध्यात्मानुपपन्नत्वं यथार्थः स्यात्तस्य येषु च त्वयथार्थो भवति अस्थूलमनणुवहस्वमित्यात्मनः स्वर्वदृश्यवैलक्ष

25

णपश्रवणात्॥ ननु तं देवा ज्योतिषां ज्योतिरित्यत्रायं पुरुषः स्वयंज्योतिरित्यात्मनः ज्योतिस्वरूपत्वं श्रूयते कथमरूपत्व
मिति चेन्न अस्थूलमित्यादि दृश्यमिति रूपवद्रूपत्वनिषेधसत्यरूपविद्रूपत्वापत्याजडत्वापत्तौ सत्यां श्रुत्यानन्दिरस्यते
प्रकाशस्वरूप आत्मेति ननु सूर्यादिवत् ज्योतिःस्वरूप आत्मेत्युच्यते तथात्वे सत्यात्मनो भौतिकत्वं तेपत्वं जडत्वानि
त्यत्वादिदोषः प्रसज्येत सूर्यादिवद्रूपत्वेन विषयत्वं च स्यात् तद्युक्तं दिव्योऽह्यमूर्तः पुरुषः सबाह्याभ्यन्तरोऽह्यजः इत्यश्रवणात् न संदृशे
तिष्ठति रूपमस्येत्यात्मनो निर्विशेषत्वमेव श्रूयते विषयभूते हि वस्तुनि ज्ञानस्य तदात्मनापरिणामो न त्वविषयभूतेप
रिणामः संभवति॥ ननु स आत्मा सविशेषपरत्वात् आत्मा निर्विशेषः श्रूयते श्रुतार्थाकारेण ज्ञानस्य परिणाममुपपद्यत एवे

रा०म०
२४

नैष्कर्म्योनेपनिष्ठातातस्यापरा ५० सत्वशुद्ध्यासम्यग्विदितात्मतत्वोमुमुक्षुरहंदः संन्यासेनसिद्धिर्नैष्कर्म्यसि
द्धिंनामसम्यग्यथायेनप्रकारेणात्तत्साधनानुष्ठानरूपेणज्ञाननिष्ठासिद्धिक्रमेणापरिपक्वज्ञानेनचब्रह्मप्राप्तिब्र
ह्मभावंगच्छतीतिविदुषोब्रह्मप्राप्तिर्नाममसंशयासंभावनाविपरीतभावनादिविकल्परहितेनसम्यगपरोक्षीकृतेस्वा
त्मनिनित्यशुद्धबुद्धमुक्तसच्चिदानंदैकरसेनिर्विशेषेद्वितीयेपरेब्रह्मणीदमेवाहमितिआत्मत्वबुद्धिकरणमेवयथा
पितृदोषेणस्वमन्यथागृहीत्वादेवदत्तस्तन्निवृत्त्यादेवदत्तएवाहमितिस्वात्मनिस्वबुद्धिंकरोतिएवंस्वाज्ञानेनस्वंब्र
ह्मविस्मृत्यगुरुप्रसादाद्वाप्तविज्ञानेनतन्निवृत्त्यास्वात्मनिब्रह्मणिस्वबुद्धिंकरोतितत्रस्वबुद्धिकरणमेवविदुषो
ब्रह्मप्राप्तिर्नतुधनवत्प्राप्तिरुच्यतेदेशतःकालतःस्वरूपतश्चप्राप्तस्यब्रह्मणोव्यवधानाभावात्अयमात्मा
ब्रह्मेतिन्यायेनाप्तुर्विदुषःस्वरूपत्वान्नित्यप्राप्तस्यवस्तुनःपुनरप्राप्तिकल्पनायोगात्नोविस्मृतकंठगभरणस्येव
मर्शनेनाप्तित्वावधारणंयथाप्राप्तिस्तथाज्ञानेनान्यथाग्रहीतेस्वात्मनिब्रह्मणिविचारजन्यज्ञानेनपुनःस्वभा
वावधारणमेवाप्तिरेवंब्रह्मवित्यथायेनब्रह्मनिष्ठासिद्धिप्रकारेणविशुद्धबुद्ध्याब्रह्मप्राप्नोतितद्यातंज्ञाननिष्ठासिद्धि
प्रकारंसमासेनसंक्षेपेणनतुविस्तरेणविशुद्धबुद्धयःसम्यग्ग्राहिणोबहुग्रन्थानुपयोगात्स्वल्पग्रंथेनतंप्रका
रंमेनिबोधनिश्चयेनबुद्ध्यस्वबुद्ध्यातदनुष्ठानपरोभवश्रुतेर्बोधस्यचफलमनुष्ठानमेवान्यथापरावर्तास्वरूपदेशेन
निरर्थकःस्यात्तथःतत्रखलुसम्यक्ज्ञानविदेहमुक्तेःपरमकारणंपापरोनिरतिशयपरिपाकलक्षणानिष्ठाय
स्समाप्तिर्विकारानिर्मुक्तोनिश्चलास्थितिःकस्यानिष्ठेत्यतआहज्ञानस्येतिनजापनेक्रियतइत्याहअपोत्त

श्री०तत्त्व०
२५

26

दीपप्रसादादेव सिध्यतीनात्मघाऊक्तिकोऽपि रश्मुद्धात्मनोपदेक्कमविषयत्वादप्रसिद्धत्वाच्चात्मनस्तदनुभवाभावात्प्र
वृत्त्यभावइतिचेत् श्रोत्रनेनतावदयमात्मास्वपमेकाद्यौवदेकांतेनाविषयः अस्मत्प्रत्ययार्थत्वेन नित्यापरोक्षत्वात्प्रका
शस्वरूपत्वात्सर्वप्रकाशकत्वाच्चप्रत्यगात्मप्रसिद्धेः नह्यात्मापमकस्यचित्कदाचिदप्रसिद्धोभवति ज्ञातव्यः नानव्योवास्मत्प्र
प्रसिद्धत्वेआत्मनोलौकिकोवैदिकश्चव्यवहारस्तवनसिध्येत्सर्वेषामात्मानमुद्दिश्यैवेष्टानिष्टयोः प्रवृत्तिनिवृत्तिश्रुतेः
दृश्यतेनतेनात्मानंदेहमारोवाबुद्धिंवामंवामन्यैः खल्वात्मसुखायैवदेहस्यारोग्यमिच्छतिवृद्धेस्तोष्टवमाहारसोप
शमंचप्राणनिरोधंयोगंचकरोतिभार्यामुद्दिश्यदेवान्यजतेहरिंभजतिततोदेहादिविलक्षणआत्माप्रसिद्धएवास्मत्प्र
त्ययार्थः नहिनामहमस्मीतिकदापिप्रमस्यकस्यापिमतत्ययोऽस्ति सर्वमहमद्राक्षंसुखमहमस्वाप्संअहंजागर्मीत्यवस्था
त्रयेऽपिसर्वैरहमस्म्येवेत्यात्मसत्तायाःसदानुभूयमानत्वादात्मनोऽस्तेयत्वानुपपत्तेः सर्वेद्रष्टृभिन्नत्वप्रसिद्धेश्च नहिस्वमेके
मासाद्यनुभवैःपरिच्छिन्नसत्तासिद्धेः प्रमाणमपेक्ष्यते सर्वेषांप्रमाणानांप्रामाण्यंयत्रनास्तिध्यातितंसर्वप्रमाणप्रामाणप
सिद्धिकारणंस्वप्रकाशमात्मानंकिन्तुप्रकाशरूपेणनस्वचेतनंचेतनंप्रकाशयतिस्वसत्तंस्वस्यैवप्रत्यक्षंततःप्रत्यक्षप्र
माणंव्यवहाराणांयथानुपपत्तिप्रसक्तायांपतिश्चप्रमाणं एवंप्रत्यक्षादिप्रमाणसिद्धस्यात्मनोवंध्याउत्रवदसत्त्वे
तत्ज्ञानस्यमनोराज्यवत्सगुणध्यानवन्मिथ्याविषयत्वंप्रमाणानिरबाध्यत्वंचसंभावयितुंनशक्यतेतथात्वेननवत्वात्
ज्ञानेस्वाचाभावत्वप्रसंगात्ततोज्ञातृत्वेनास्मत्प्रत्ययार्थत्वेनसर्वव्यवहारकारणत्वेनपरप्रेमास्पदत्वेनचप्रसिद्धत्वा
दात्मानायमप्रतोताविषयोभवतिकिंतुस्वच्छत्वान्निर्मलत्वात्स्वप्रत्वात्सूक्ष्मबुद्धिगम्यत्वाच्चैनन्यूनीभासः यैप्रकाशव्याप्तः
स्फटिकस्मर्यवद्यथातथात्मवदवभासतेनाहंपरबुद्धिष्याप्यामनआदिस्थूलान्तंसर्वमात्मवदवभासतेतेनदेहेंद्रिय

राम०
२५

तिवेन्ना। एवमेवं ध्यातुर्ज्ञोयानीत्यादिश्रुतार्थाकारतानवसंगतात्तहृदत्तानस्यमनोराग्स्यवन्निषिद्धान्वोयपपन्नेश्रुत्नहिश्रुतंश्रावि
तेवामननामाभावितेनावस्तुनिहृदयरूतानंवमन्यभवतिममारागान्तरेणचवाध्यतेयतनएवमनः आत्म। विषयकंत्तोनमेवनुसं
भवतिनतत्संभवेविदुषःकथंतेनिष्ठासिध्यतीतिचेन्नमन्यस्यादिममारागाभ्यन्तात्तादात्म्यसत्तापास्तनत्तानांसंभवासिद्धेः
कुत्रचिन्नत्रसंसमारागंकुत्रचिद्वस्तुमात्रंकुत्रचिच्छास्त्रंकुत्रचिदर्थापत्तिः आत्मविषयत्वेनसर्वेषमारागमेवभवतिनतुचोते
देहेद्रियादयोविशिष्टाश्चमंतेः स्वतोजडत्वेसतिदृष्टानिष्टत्वात्तिनिवृत्तिमत्वाघन्तेवंनत्रैवंपद्यशरकृदैः नदेवविष्टातात्मादेहादि
भ्योभिन्नः विषयमकत्वाद्व्यतिरेकवदिर्मघृतमानेनुनांतः मतंनवहिः मतमिन्मादिमात्रेणचात्मावगंतुंशक्यतेपरिशेः य
थाचाद्येकादशीशिवरात्रिरितिपास्त्रेरागेनुमयीक्रतोयो ध्यतेनथाविदुषानोतेः मतंमपंचोपथमंशिवंशांतमद्वै
तंचतुर्थंमन्यंतेसआत्मेतिशास्त्रेरामकलहस्यसंबंधंनिषिधापितेकेवलमात्मत्वंस्वात्मनावगंतव्यमुभयो। शा
स्त्रमतिपाद्यत्वाविशेषान्न नन्तु नीतेः मतंमितिश्रुतस्यार्थस्यनिर्विशेषत्वेनोपलब्धमभावाद्ध्यावत्त्वदसत्वमेवेति
चेदेकादश्यामपिविशेषाकारादर्शनात्स्वरूपेणतुल्यत्वात्ननुदृष्टेषत्वमसंगातत्तउभयोरपिशास्त्रैकगम्यत्वतदु
क्तत्वेनाप्युपगम्यत्वंचसममेव। ननुएकादशीवदात्मसद्भावःशास्त्रेणांगीक्रियतएवेतिचेन्नेपयानिस्वरूपेणमवृत्ति
स्तथानाहंदेहादिरितिस्वरूपेणानात्मन्यहंभावंपरित्यज्यब्रह्मैवाहमितितरह्मस्योपनानेपुनर्विकल्पनात्सिद्धमेवमा
मारागेकस्यममोरागस्यचफलेनन्न। स्माकंशास्त्रेममारागमेवतथाप्यविषयत्वादात्मनस्तदनुभवाभावोऽत्रहृत्प
भावइतिचेन्नहि एकादश्याः मम स्वत्वंतदनुभसाममहृतिरितस्ततनमत्वंस्वीपंमकस्विंपरितानांमुदृगुरुनामेवमुमु
क्षूणांमोक्षशास्त्रेतस्मिन्नितिपादितार्थेतुविश्वासोहदः अन्वयः मवृत्तिश्चसहस्रेकोविजन्मार्जितवतपोजपोवारिपाकवशा

सर्वपरः=

ति

ः सर्ववादः=२
श्वारम्भा
त्मन्नामि
सिद्धातः=२ तत्रेत्यारभ्यफलसिद्धातसिद्धांतः=३

गी०त०प०
२६

अथ नित्यद्रव्यसिद्ध्ये मुमुक्षोर्ज्ञाननिष्ठासंपादनीयेत्युच्यते भगवता निष्ठा ज्ञानस्य या परेति। ननु मुमुक्षोर्ज्ञाननिष्ठा संपादनीयेत्यु
च्यते ज्ञाननिष्ठा नाम ज्ञाने ज्ञानस्वरूपे ब्रह्मणि स्थितिः ज्ञानस्य ज्ञानत्वेन स्थितिर्वा किं ज्ञानाभ्यासः समाप्तिर्वा नाद्यः केवलज्ञानमनसो ब्रह्म
णि स्थितिसंभवान्न द्वितीयो ये ज्ञानस्य ज्ञानहेतोर्वेदान्तशास्त्राभ्यासस्य निष्ठा परिसमाप्तिर्वा उत ज्ञानस्य श्रवणपावृत्तेः परिसमाप्तिर्वा
नाद्यः केवलग्रंथस्य मुख्यतर्कवदावृत्त्या ... र्थविज्ञानप्रयोजनादर्शनान्न द्वितीयः तत्त्वमसीति तत्त्वंपदार्थशोधनपूर्वकं वाक्यार्थ
श्रवणमात्रेणैवाहं ब्रह्मास्मीति विदुषो ब्रह्मात्मप्रत्यये संपद्यमाने पुनःपुनस्तदावृत्तेः फलादर्शनादहं ब्रह्मास्मीति संपन्नज्ञा
नस्यैव ब्रह्मात्मप्रत्ययस्य दार्ढ्याय पुनःपुनरावृत्तिः कर्तव्येति चेन्न पश्यामि ये केलोके संभावनराजत्वस्य स्य पुनः पुनः पुनः राजाहमि
ति वृत्त्युत्पत्तिभिः सम्यक् शोधितयोस्तत्त्वंपदार्थयोरेकत्वावबोधकवाक्यार्थश्रवणमात्रेणाहं ब्रह्मैवेति ब्रह्मात्मभावापन्न
स्य पतेः पुनःपुनर्ब्रह्मैवाहमिति प्रत्ययावृत्त्या पुनरुपाधिकृतपरिच्छित्तिविनाफलान्तरादर्शनाद्राज्ञ आवृत्तिक्रिया राजत्वमि
व ब्रह्मत्वमात्मावृत्तिक्रियया कल्प्यं वस्यान घटोपमितस्तु पदेशमात्रेण घटविषयकं ज्ञानं जायते ... इति प्रयाजापतेरेव नत्व
मसीत्युपदेशमात्रेणाहं ब्रह्मेति ब्रह्मात्मत्वापादकं ज्ञानं शुद्धात्मनो जायत एव नात्र पुनःपुनः प्रत्ययावृत्तिरपेक्ष्यते नहि चक्षु
स्सन्निकर्षमात्रेण घटज्ञाने जाते घटो यं घटोयमिति ज्ञानोत्पत्त्यर्थं मुहुर्मुहुर्वृत्तिरपेक्षिता भवति प्रमाणप्रमेयसंबंधमा
त्रैकसाध्यत्वात्प्रमायाः नत्वावृत्तिसाध्यत्वमस्ति वस्तुतन्त्रत्वात्ज्ञानस्य न तु पुरुषतन्त्रमतो ज्ञानाभ्यासोनिष्प्रयोजन एवेति चेन्न सं
प्रमाणप्रमेयसंबंधमात्रजन्यमेव ज्ञानं वस्तुतन्त्रं न तु पुरुषतन्त्रं नापि क्रियापातन्त्र्यं तथापि सोत्पत्तौ प्रमाणासौष्ठवमपेक्षते वा
स्तवमपि ज्ञानं सति प्रमाणासौष्ठवे सम्यचीनं जायते नत्वसौष्ठवे यथा चक्षुषः काचकामलादिदोषेणानैर्मल्ये तेन ज्ञानेन तत्ज्ञानम
वास्तवमेव जायते वस्तुनो विस्पष्टत्वेपि तस्यैव निरंतरोपधसेवया तद्दोषनिवृत्त्या निर्मलत्वे सिद्धे वास्तवमेव चाक्षुषं ज्ञानं विस्पष्टं तं

गी०प०
२६

27

मारणमनोबुद्ध्यादिषु नात्मत्वस्य हि मिथ्यात्वात् बुद्धिस्थं वै यां मनुष्योऽहं ब्राह्मणोऽपतिरिति द्रष्टा श्रोता कारणः स्वं जोहमिति सु
खितः पिपासितोऽहमिति कर्त्ता भोक्ताहं सुखी दुःखी नेवमारोपितैरनात्मनत्यत्पे द्रष्टो ... जेलमिव मेघपटलैः स्वं द्रष्टव्यं निरो
हितमपारिस्पष्टं नभ कामतेशतधा सुतोमत्वाप्यना घविघाव मनपाये द्रिता ऽविविहितंतः परिरक्षणमप्यात्मानमति स्पष्टमतो
द्रिपमनवगाव समारोपितमेव स्थूलमनात्मानपात्मत्वेन गृह्णाति मत्वात्मानं तन्नोपाघविघारोपितानामंतबुद्ध्यादीनां बहिर्घटप
टादीनां नत्तु मत्स्यानां च सर्वमिदमहं च ब्रह्मैवेति सर्वत्र प्रत्यग्दृष्ट्या ब्रह्मैकविषयानिरामएवकर्तव्यः तनन ब्रह्मस्यमस्याहत्या विपरी
तमपश्यानानि श्रेष्ठपनिहतो मत्सा शैवालनिहतो स्वच्छं सुखकरं जलमिव मेघापाये सूर्यमानंदकरं चन्द्र इव स्वच्छं एवं विदित
आनंदघनत्वात्माता नेव सुखः सम्यग्विषयो भवति एतत्स्वंतत आत्मावरकानात्मत्वपनिरसनएव प्रयत्नः कर्तव्यमितिहृद
सुस्वयाविद्धुषामत्वात्माकोहंशः किं लक्षणः कथं तिष्ठति कुत्रास्ते कथं प्राप्य इत्याकांक्षावतेन्याय वेदनेवतस्याहंमूर्धत्वेन
[illegible] स्वतोऽस्ति हुत्वा नित्यत्वाच्च कालदिगादेर्निराकारस्यापि च तानेवास्त्याचार्योपदेशाभ्यां सिद्ध्यतीत्यत्र घेकादशीं प्रेचोतिकि
मुतत्वस्वरूपत्वेनास्ति हृस्या आत्मनोऽतानेवास्त्याचार्योपदेशेनसिध्यतीति आत्मतानेनेवहि स्वरूपं च विज्ञानोऽस्म्यहं ममेदमिति
पः स्वप्नमग्ना सुप्तसुखमस्वा स्वप्ने सोऽहं जाग्रत्यनुभूयमाने स्मृत्वस्य देहेन्द्रियादिमित्रं च स्वप्ने सुषुप्तौ बुध्यादि मित्रत्वं
ज्ञात्वा तत्वं च सर्वतत्वाप्यात्माकस्मिंस्तानंकथमिति वक्तुंपठितस्यच उक्तं पस्यमकोशेनेदं सर्वं वहिरंत विज्ञानातितत्तेन
न सिध्यतीति वचनमतीव साहसमेव घोषेति निमाहुः सोत्र दृति सेत्रे सत्रेधर्मजातं च सर्वे यो विजानाति सोऽहमात्मेत्यात्मेति
नयतेस्य हृत्वात्मनः परमेश्वरस्य सादात्म्यसुलभन रमेवचस्माद्वैतं नस्यादात्माणुप्रसिद्धः तत्तानमव्यात्मेश्वरस्य सादात्म्यसुलभ
तममेवैतिकृत्वात्स्तु हृत्वात्मनोपनेतसहसुरूपदेयात्रमात्रेणैवात्मतानस्यानात्मवासनाकृतविपरीतप्रत्ययनिरोधनिरोधना

नैतेनब्रह्मभावः कस्यचित्सोभवतिनाहंमनुष्यस्मत्तोन्योमनुष्यत्वमपोह्यनेनत्वहमर्थस्यैकत्वप्रतिपादनेनापिब्रह्मभावोपिस्वहम
र्थत्वस्यस्वतःसिद्धत्वादप्रमात्वात्ब्रह्मैवेतिस्वेद्रष्टंचापिमांविद्धीतिब्रह्मभावस्यश्रुतिस्मृतिप्रसिद्धत्वान्नतिनयोमेदेक
त्थमद्वैतंसिध्येदेकमेवाद्वितीयंब्रह्मनेहनानास्तिकिंचनएकोरुद्रोनद्वितीयायतस्थुरित्यादिश्रुतिभिरद्वैतमेवप्र
तिपाद्येतेनतत्त्वेवोद्दिष्टाकाशमहाकाशयोरिवब्रह्मात्मनोरभिन्नत्वंस्वतःसिद्धंनतुक्रियापाकल्पितंतुयत्कर्त्रादिकंतुस
त्रस्यपाधृत्वानादिवासनयामनीयमानविपरीतभव्यपायनोदनमात्रमेवक्रियतेश्रेयोविदास्वस्वरूपत्वस्तानदा
द्यौपपद्यास्थूलमपिरलक्षानंस्वदास्यार्थंनित्यपरिशीलनमपेक्षतेयथारविबिंबतानंस्थूलमपिसर्वंबामपरो
क्षतापविरकालनित्यनिरंतराध्यासमपेक्षतेतथेवब्रह्मात्माभिन्नत्वतानमतिसूक्ष्मंसमनतिपक्षंचाविमुनस्वस्याप्र
तिबद्धत्वसिद्धयेसतत्र्यस्यपावृत्तिमपेक्षतइतितस्याभिध्यानाद्योजनात्तत्वभावादितितस्याभिध्यानात्तृतीयंदेह
भेदेइतिनिष्कलंध्यायमानरतिध्यानाद्मुनिर्गच्छतीत्यनयोनिमित्तादिश्रुतिभिरुक्तत्वात्तत्ताकनस्याप्रतिबद्धत्व
सिद्धयेसजातीयप्रत्ययावृत्तिलक्षणस्समाधिःकर्तव्यत्वेनप्राप्तेनेतमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणइतिप
तत्त्वेमतस्सावत्स्यसिद्धयेद्वैतमप्त्यपायनोदकस्ससत्त्यावृत्तिलक्षणोस्याभ्यासःकृतःश्रवणस्यविदिता
त्मनेत्वस्यमुमुक्षोर्यत्नेस्साहकारिसाधनैस्तद्धुद्धित्वादिभिरद्वैतसूत्वादिमिश्रवस्यमारोश्चसंपन्नस्यावश्यंकर्त
व्यइतिषष्ठाध्यायेनिरूपितमेवार्थंप्रवनर्हष्ठपितुमुमुक्षोभगवतानिर्बोधमेसमासेनतुकौन्तेयनिष्ठाज्ञानस्ययापरे
तिपद्यतेंज्ञानेहेतोर्वेदान्तशास्त्रस्याद्वृत्त्याश्रुष्कतर्कवद्वाक्यसंविनाप्रयोजनाभावादितितत्त्वेदान्तश्रवणस्यैकलभ्य
तेन प्रसादे सिद्धायाः सर्वतानन्तत्कार्यनिवृत्तेः फलमाह स्मृतिरिति आत्मविद्याकृतकर्तृत्वभोक्तृत्वादिसर्वसंसारनिमु
क्तो नित्यकूटस्थोऽसंगश्चिद्रूपो निष्क्रियः प्रशान्तो य आत्मा सर्ववेदान्तप्रसिद्धः स एवाहमस्मीति स्वात्मनो विषयास्म
निर्लेपाय योऽस्माद्दाढ्यस्मृतोऽर्थस्यापूर्ववाक्येन स्मृतिस्तथा त्वत्प्रसादान्मया लब्धा भवति सर्वहृदयग्रंथीनां निर्मुक्त

43

साधनपराः मम प्रियाः तेभ्यः सर्वेभ्यः प्रियो गीतार्थोपदेष्टा यतः स्वयं तीर्णः परेषामपि तारणाय प्रवृत्तस्ते तु स्वतरणाय
व प्रवृत्तास्तस्मादयमेव प्रियकृत्तमो नान्यः कश्चिदिति लौकिकोऽर्थः । अतः परमपि मम तस्मान्मनुष्येभ्यो गीताशास्त्रो
पदेष्टुरन्यः प्रियतरः प्रियकृत्तरो भुलोके न भविता भाविकालेऽपि न भविष्यति संसारदुःखसागरनिमग्नान्मनुष्यान्मु
मुक्षून्दयया वेदशास्त्रार्थोपदेशेन यो ब्रह्मविद्युक्तिस्समुद्धरति स एव कालत्रयेऽपि मम परमेश्वरस्य प्रियकृत्तम इति
तात्पर्यार्थः ।६९ श्रद्धया भक्त्या च नित्यं यो मुमुक्षुर्गीतापारायणं करोति तस्य फलमाह ६९ अध्येष्यते च य इमं धर्म्यं
संवादमावयोः । ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ७० तव च मम च आवयोः संवादं संन्यासपूर्वकं धर्म्यं धर्मं मो
क्षैककारणस्य ज्ञानस्य सिद्धिहेतुत्वाद्धर्मादनपेतं धर्म्यमिमं ग्रन्थं गीताशास्त्रं यः मुमुक्षुः [illegible] श्रद्धया
भक्त्या वा अर्थज्ञानपूर्वकमध्येष्यते नित्यं नियमेन पठतीत्यर्थः तेनार्थज्ञानपूर्वकं गीतापाठं कुर्वता मुमुक्षुणाहं पर
मेश्वरस्तत्त्वज्ञानयज्ञेन ज्ञानमात्मैकत्वविषयं तदात्मनैव यज्ञो ज्ञानयज्ञः तेनेष्टः आराधितः स्यां भवेयं गीतापठनस्या
र्थज्ञानपूर्वकत्वाद्ध्यानरूपत्वात्तदर्थत्वात्तदनुसंधानेन यत्फलं कैवल्यलक्षणं तत्क्रमेण गीताध्येतामाप्नोतीत्यर्थः
मेवमुरध्येतुः फलमुक्त्वा श्रोतुरिदानीं फलमाह ७० श्रद्धावाननसूयश्च शृणुयादपि यो नरः । सोऽपि मुक्तः शुभा
ंल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ७१ विचाराध्ययनयोरनधिकारी योऽपि पश्चान्नरो नरमात्राकारवान्न स्त्री वा शूद्रो वा
श्रोजनो वा न तु अश्रद्धावान्वक्तेरि गीतापामविषये गुरौ च श्रद्धा भक्तिसंपन्नस्तथानसूयः सूयादिदोषरहितो भगवानि
त्यमिदं गीताशास्त्रं शृणुयात्सोऽपि श्रोतापि ताभ्यामज्ञानकृतेभ्यः पापेभ्यो मुक्तस्तत्पुण्यकर्मणामश्वमेधादियाजकानां

१

षां निष्ठा तु का कृष्ण त्यागोत्सर्जनस्य प्रश्नोऽनुपपन्न एवेति चेत् सत्यं यद्यपि शास्त्रविध्युत्सर्जनमुभयत्र सममेव तेषा
मेतेषां च तथापि श्रद्धान्वितत्वविशेषणविशिष्टत्वात्तेषामेतेषां च विशेषो विद्यते कामकारत इति तत्र का
मकारत्वविशेषणविशेषणाविशेषोपपत्तेः शास्त्रविधिमुत्सृज्येति न त्वा शास्त्रोक्तं घनटोपविशेषा
स्त्वेतेषामेतेषां च भेदो विद्यत एव। ननु शास्त्रविध्युत्सर्जनमत्रापि च विद्यत एवेति चेन्न। शास्त्रविध्युत्सर्जन
पदेनात्र शास्त्रार्थापरिज्ञानं विवक्षितं न तु ज्ञात्वा विध्युल्लंघनं॥ ननु तर्हि शास्त्रार्थानभिज्ञानां मूढानां
कथं वैदिके कर्मणि प्रवृत्तिरिति चेद्दृश्यते। यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन इति न्यायेन ज्ञानकर्म
श्रेष्ठप्रवृत्तिसंदर्शनेन मूढानामपि श्रद्धावतां सद्बुद्धीनां वैदिके कर्मप्रवृत्तिरुपपद्यते। इति न्यायो बुद्धे
बुनमस्तु सर्वसु बालानां नमतत्क्रिपाप यातथा॥ तत्र तेषामेतेषां च विशेषस्य मे हार्दे इति स्थितितत
एवार्जुनेन पृष्टे तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः इत्यत्रोत्तरं कारणतातेकीयं बोधयितुं रामे
न्तव्यज्ञाते सत्यस्य तत्कारणं श्रद्धा भेदत्रीपयेन ननि ह्याभेदं बोधयितुं श्रीभगवानुवाच॥ त्रिविधा भवति
श्रद्धा देहिनां सा स्वभावजा॥ सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥१॥ देहिनां प्राणिनां श्रद्धा सात्त्वि
की राजसी च तामसी चेति त्रिविधैव त्रिप्रकारा त्रिधैव भिन्ना भवतीत्यर्थः॥ श्रद्धायास्त्रैकारण्यमाह॥ स्वभा
वजेति॥ आयुः कर्म च वित्तं च विद्या निधनमेव च। पंचैतानि विलिख्यन्ते गर्भस्थस्यैव देहिनः॥ प्राग्भावी पुण्या
पुण्यापादि संस्कारः स्वभावः तेन सह भवतीति स्वभावस्तस्माज्जाता स्वभावजा यद्वा स्वभावः सत्त्वरजस्तमोगु
णात्मिका प्रकृतिः तत एव सत्त्वादिगुणभेदात् श्रद्धापि सात्त्विकी राजसी तामसी चेति भेदत्रयमुपपद्यत इत्य
र्थः॥ यत्प्रधानत्रिपापा वर्त्तमानानां देहिनां निकृष्टं त्वं स्पष्टयति तां श्रद्धां मयोच्यमानां शृणु श्रद्धासंभूतिप्रकारं
शृणु इत्यर्थः॥२॥ सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत॥ श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥३॥

विशेषसिद्धे

रामा०

१

44

भ०:

श्रीगणेशाय नमः ॥ ॐ ॥ एवं दैवासुरसंपद्विभागांतत्स्वरूपं तत्फलं चासुराणां ज्ञानानधिकारित्वबोधनायासु-
रसंपत्तिमतां कामसंकल्पगुणाकर्मीत्तिं च फलं च विशिष्य प्रतिपाद्य मुमुक्षोः शास्त्रज्ञानेनैव कर्म कर्तव्यमि-
ति निरूप्याऽधुना शास्त्रार्थानभिज्ञानामपि शास्त्रीयमेव कर्म कामकारं विना श्रद्धया कुर्वतामपि मुमुक्षूणां
सात्विकेष्वेवाहारयज्ञतपोदानादिषु प्रतिष्ठितानां ज्ञानाधिकारः शमदमादिबहुसंपत्त्या प्राप्तानेन मोक्षाधि पु
कारश्च पुमर्थ इति वोधयितुं सप्तदशाध्याय आरभ्यते ॥ तत्रादौ यः शास्त्रविधिमुत्सृज्येतितस्मार्तांते इति शा ङ्कामं
स्त्रविधित्वात्पितमुत्सृज्य कामकारेण यः प्रवर्त्तते स आसुरस्तस्य न चित्तशुद्धिर्नैवज्ञानं नापि तत्फलं च सि-
ध्यतीति श्रुत्वा शास्त्रार्थमजानतां कामकारं विनैव श्रद्धया कर्माणि कुर्वतां पुरुषाणां दैवी वासुरी वा का वा
संपत्तिः का गतिस्तेषामिति जिज्ञासुरर्जुन उवाच ॥ ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः ॥ ते-
षां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥ १ ॥ ये सामान्याः पुरुषाः शास्त्रविधिं श्रुतिस्मृतिलक्षणं शास्त्रं
तद्विधिविधानं श्रौतस्मार्तसंन्याध्ययनतदर्थपरिज्ञानाभावादनुष्ठानविधिमुत्सृज्यापि तापश्रद्धयावृ-
द्धव्यवहारसंदर्शनसमुत्पन्नया आस्तिक्यबुद्ध्या विनैव कामकारं वैदिके पुनिपते शुक्कर्मस्वतंतविश्वा-
से नान्विताः संतो वैदिकेन कर्मणा देवान्यजंते शास्त्रार्थमज्ञात्वापि श्रद्धया भक्त्या च श्रौतस्मार्तेच कर्म-
ये कुर्वंतीत्यर्थः ॥ तेषां श्रद्धया कर्माणि वैदिके प्रवृत्तानां पुरुषाणां निष्ठा स्थितिः का किं तु सत्त्वमाहो
रजस्तम इति कारणेन कार्यं लक्ष्यते तु शब्दः पूर्वव्यावृत्त्यर्थः ॥ तेषां तु निष्ठा वृत्तिः सात्विकी वा उत राजसी
किं तामसी वा कथ्यतामिति अत्र सत्त्वशब्देन दैवसंपत्तिः रजस्तमः शब्देनासुरसंपत्तिर्विवक्षिता दैवासु-
रसंपत्त्योरधिकारविचारे प्रक्रांतत्वात्तेषां संपद्दैवी वा उत आसुरी वेति प्रश्नार्थः ॥ १ ॥ ननु यः शास्त्रविधि-
मुत्सृज्येति अनेनैव वचनेन शास्त्रविधिमुत्सृज्य यः प्रवर्त्तते स आसुर इत्येतेषामप्यासुरत्वमुक्तमेव पुनस्ते

मेव धर्मं प्रतिपादयति द्वाभ्यां॥ अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः॥ दंभाहंकारसंयुक्ताः कामरागबलान्विताः
॥५॥ कर्षयंतः शरीरस्थं भूतग्राममचेतसः॥ मांचैवांतः शरीरस्थं तान्विध्यासुरनिश्चयान्॥६॥ दंभो मं
त्रतंत्रवेषभाषादिना स्वपरिकरारोपः॥ अहंकारः कुलशीलविद्याश्रमादिभिः स्वोत्कर्षोऽहमित्यंतःकरणा
रोपः। ताभ्यां संयुक्ताः कामरागबलान्विताः कामः ऐहिकामुष्मिकभोगापेक्षा यः रागस्तेषामुपभोगे
च्छा बलमिच्छावेगस्तैः समन्वितास्ततश्चाऽचेतसोऽविवेकिनोऽयमर्थाः शरीरस्थं स्थूलशरीरत्वद्दरे
णामत्र विद्यमानं भूतग्रामं स्थूलसूक्ष्मरूपप्राणिसमुदायं पंचधा। प्राणो हि पञ्चात्मकः कर्षयंतोऽन्नरसाद्यभा
वेन शोषयंतो मां चैवांतःशरीरस्थं अंतःशरीरं बुद्धिः तत्र सर्वप्रकाशकतया विद्यमानं मां चापि प्रत्यगूपं क
र्षयंतो मनोबुद्ध्योर्हि पाराग्भूपकाशकताऽतिग्लानिप्रदृष्टस्फुरत्ते समग्रात्मचैतन्यस्य स्फुरणं न भवति तदभा
व एवासम्यगात्मनः कृशीकरणं कुर्वंतः संतस्तपस्तप्यंते उपवासव्रतादिनोकायशोषणां काम
रागबलानुरूपया श्रद्धया ये कुर्वंतीत्यर्थः॥ तानासुरनिश्चयान् आसुरो निश्चयो येषां तानासुरनिश्चया
न्विद्धि दुष्करव्रतानासुरान्विजानीहीत्यर्थः एतेनाभासश्रद्धावतां राजसानां तामसानां चासुर्येव संपदिति
सूचितं तेन सात्विकानां दैव्येव संपदिति सिद्धं॥५॥६॥ एवं श्रद्धाभेदेन देवादिपूजनभेदेन शास्त्रीयोऽ
शास्त्रीयकर्मानुष्ठानेन च सात्विकराजसतामसा ज्ञातव्या इति सूचयित्वाऽधुनाऽऽहारेणापत्तेन तपसा
दानेन च ते ज्ञातव्या इति सूचयितुमाहारयज्ञतपोदानादीनां सत्वादिगुणभेदेन त्रैविध्यं प्रतिपाद
यति॥ सात्विकैस्तु मुमुक्षुभिः सात्विका एवाहारादयः चित्तशुद्धये कर्तव्या नान्ये इतरे इति ज्ञापयितुं च॥
आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः॥ यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु॥ ७॥ स्पष्टोऽर्थः
॥७॥ आयुः सत्वबलारोग्यसुखप्रीतिविवर्द्धनाः॥ रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः॥८॥

45

रा.मा.
२

सत्वानुरूपा। सत्वमिति रजस्तमसोरुपलक्षणं। सत्वरजस्तमोगुणानामनुरूपा गुणत्रयभेदानुविद्धा सर्वस्य
प्राणिजातस्य श्रद्धा भवति पुराणपुराणकर्मवशादंतःकरणविजृंभितसत्वादिगुणभेदमाश्रित्यैव पुरुषा
णां श्रद्धा भवति न तु पुरुषभेदमाश्रित्येत्यर्थः॥ ननु सत्वादिगुणानुगुणत्वेन प्राणिनां श्रद्धा भवतु प्रकृते
किमायातमित्याकांक्षायामाह॥ श्रद्धामयइति॥ अयमिति हृदि व्यवहारोपलक्षिते अयं प्रत्यक्षः व्यव
हारविषयः पुरुषः श्रद्धामयः अधिकृते पुरुषे श्रद्धा प्राचुर्येण दृश्यते ततोयं श्रद्धामयः श्रद्धाप्र
धानत्वात् श्रद्धामयइत्युच्यत इत्यर्थः॥ ननु पुरुषस्य श्रद्धामयत्वे सिद्धे पि कानिष्ठेत्यतः किमुत्तरमित्या
कांक्षायामाह॥ यइति॥ योधिकारी पुरुषः स्वधर्मनिष्ठो यच्छ्रद्धः यद्गुणसंभावितश्रद्धावान् भव
ति स पुरुषः स एव तद्गुण एव भवति सत्वगुणसंभावितश्रद्धावान् सात्विकः रजोगुणसंभावितश्रद्धावा
न् राजसः तमोगुणसंभावितश्रद्धावान्तामसो भवतीत्यर्थः॥ यद्यपि श्रद्धा सत्वस्यैव धर्मो न तु रजस्तम
सोस्तथापि तयोः प्राधान्ये सत्वपिहितत्रसत्वस्योपमर्जनत्वसंभवात् तद्रूपितद्धर्माभासः श्रद्धाऽऽभासि
की संभवत्यत एवोच्यते यच्छ्रद्धः स एव सइति। एतेन सत्वरजस्तमोगुणसंभावितश्रद्धावतां तेषां नि
ष्ठाक्रमात्सात्विकी राजसी तामसी तामसी चेत्युत्तरसूचितं भवति। ततः सिद्धं सात्विकानां दैवी संपद्राज
सतामसानां त्वासुरी संपदिति॥ ३॥ एवं सत्वरजस्तमःसंभावितश्रद्धावतां पुरुषाणां सात्विकी राजसी तामसी
चप्रकृतिरिति सर्वपित्रा तेषां प्रकृत्यनुरूपाणि कर्माण्याह कर्मणां लिंगेन तेषां स्वभावो ज्ञातव्यइति॥ य
जंते सात्विका देवान् यक्षरक्षांसि राजसाः प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः॥४॥ सात्विकाः श्रद्धया
देवसंपत्तिमंतो देवान् [illegible] वैदिकेन कर्मणा यजंते सात्विक्या श्रद्धया। तदन्ये राजसास्तामसाः आसुरसं
पत्तिमंतो राजसास्तामसाश्च श्रद्धया यक्षरक्षांसि पिशाचान्भूतगणांश्च यजंते॥४॥ राजसानां तामसानां वासुर

ॐ

३

तिद्धि जातिस्मरः पश्य कृमिनरत्वं प्राप्तत्वमीश्वरप्रसादातिशयेन शतकोटिजन्मार्जितपुण्यविशेषातिशयबलत्वेन
जासंतरीयाणां मयि स भवति धर्मेष्वाधादिषु तद्बुद्धीनच्छाद्यंतरीयाणां मयितेषां भक्त्या समाराधनत्वे वा धना-
र्थं पूजनं प्रणामशुश्रूषाभ्नोदिभिराराधनं। शौचं वाह्यमांतरं शुद्धिः। आर्जवं कर्तृत्वेकर्मणि साधुत्वं च सर्वत्रम-
नो वाक्कायकर्मणामेकरूपता। ब्रह्मचर्यं च यमनियमेषु कालं रतिः॥ अहिंसा प्राणपीडनं। च शब्दः समुच्चया-
र्थः। तदेतत्सर्वं शरीरनिर्वर्त्यत्वाच्छारीरं तप उच्यते॥ १४॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्। स्वाध्याया-
भ्यसनं चैव वाङ्मयं तप उच्यते॥ १५॥ अनुद्वेगकरं अपरुषं। सत्यं यथार्थभाषणं। प्रियं मनःश्रवणानंद-
करं। हितं पुरुषार्थकारि वाक्यं। अनुद्वेगकरं च सत्यं हितं प्रियं चेति वाक्यस्य चतुर्विधविशेषणानां समुच्च-
यार्थश्चकारः॥ अनुद्वेगकरत्वसत्यत्वप्रियत्वहितत्वविशेषणानां चतुष्टयविशिष्टस्यैव। वाक्यस्योच्चा-
रितत्वे वाङ्मयं तपस्त्वं सिध्यति। यथा उदात्तादिस्वरचतुष्टयानेकत्वं सैव वेदस्य वेदत्वं तद्व-
न्नैवैकेन द्वाभ्यां वा त्रिभिर्वा विशेषणैर्विशिष्टस्योच्चारणे न संभवत्यतो मुमुक्षुर्विशेषणचतुष्टय-
विशिष्टमेव वचनं वदेदिति सिद्धं बलं प्रपन्नस्यापि वाङ्मयतपसं तर्भावदनीयं हि॥ स्वाध्यायाभ्यसनं
चेति। प्राङ्मुखत्वपवित्रपाणित्वादिनियमविशिष्टं स्वाध्यायाभ्यसनं नमोक्तिरपि तप एवेत्यर्थः
वाङ्मयं तदपि वाचा निर्वर्त्यमानत्वाद्वाङ्मयं तप उच्यते॥ चकारात्स्तोत्रपाठादिरपि वाङ्मयं त-
प एव भवतीत्यर्थः॥ १५॥ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः॥ भावसंशुद्धिरित्येतत्तपो रा.मा०
मानसमुच्यते॥ १६॥ मनःप्रसादः मनसो विषयेभ्यो विक्षिप्तव्याधिकारालमलैकत्र्यावस्था न प्रसादः
सौम्यत्वं। उपकारिण्यपकारिण्यपकारिण्यपि दृष्टपीनीष्ठे च यथापातरहितत्वेन मनसोऽवस्थानं सौ- ३
म्यत्वमक्रूरता वा मौनं मुनेर्भावः मौनं सगुणस्य वा निर्गुणस्य वा ध्यानसंधानपरत्वं। मौनं ध्यानपराय

46

१ स्पृक्जीवनस्य स्वोपकारपरोपकारसमर्थस्य

आयुषो जीवकजीवनस्य सत्वस्यान्तःकरणस्य उत्साहस्य बलस्य देहेन्द्रियशक्ते आरोग्यस्य रोगानुदयस्य सु
खस्य संतोषस्य प्रीतेः सुखहेतुप्रीतेः विवर्द्धनाः वर्द्धकाः रस्याः रसोपेताः मधुराः स्निग्धाः स्नेहयुक्ताः स्थि
राः सारवन्तः हृद्याः मनोरमाः आहाराः सात्विकप्रियाः ॥८॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदा
हिनः ॥ आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥९॥ अतिशब्दः कट्वादिभिः प्रत्येकं संबध्यते
अतिकटुः अतितिक्तो निंबादिः कटुकः तीक्ष्णः [illegible] अत्यम्लो [illegible] रूक्षः
[illegible] स्नेहः प्रियंग्वादिः विदाही सर्षपादिः [illegible] दुःखप्रदाः शोकरोगप्रदा आहारा राजस
स्येष्टा ॥९॥ यातयामं गतरसं पूति पर्युषितं च यत् ॥ उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं ॥१०॥
यातयामं मंदपक्वं । गतरसं अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते ॥ [illegible] अतिपक्वं । पूति दुर्गंधि
पर्युषितं पुरातनं उच्छिष्टं भोजनशेषं । अमेध्यम् अपवित्रं भोजनं तामसप्रियं ॥१०॥ अफलाकां
क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ॥ यष्टव्यमेवेति मनः समाधाय स सात्विकः ॥११॥ यष्टव्यमेवाने
न मम स्वर्गप्राप्तिलक्षणः पुरुषार्थः सिध्यतीति मनः समाधाय मनसो नैश्चल्यमापाद्य श्रद्धा
भक्तिभ्याम् अफलाकांक्षिभिः निष्कामैः श्रोत्रियैः सत्त्वमनोभिर्वैदिकैः विधिदृष्टः विध्युक्तः नियमो
पेतो यो यज्ञ इज्यते स सात्विको यज्ञ इत्यर्थः ॥११॥ अभिसंधाय तु फलं दंभार्थमपि चैव यत् ॥ इज्य
ते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं ॥१२॥ स्वर्गादिफलार्थं वा दम्भार्थं वा क्रियमाणो यज्ञः राजस इत्य
र्थः ॥१२॥ विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणं ॥ श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥
१३॥ स्पष्टोर्थः ॥१३॥ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ॥ ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥
१४॥ देवा ब्रह्मादयः द्विजाः श्रोत्रियाः गुरवः पित्राचार्योपाध्यायाः प्राज्ञाः ब्रह्मविदः प्राज्ञा

१८॥ दानस्य त्रैविध्यमाह॥ दातव्यमिति यद्दानं दीयतेऽनुपकारिणे। देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतं
२० स्पष्टोऽर्थः॥२०॥ यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः॥ दीयते च परिक्लिष्टं तद्दानं राजसमुदाहृतं॥२०॥ प
परिक्लिष्टं लोभातिशयेन ततः करणात् क्लेशसंयुक्तं यत्तद्दानं राजसं॥२१॥ अदेशकाले यद्दानमपात्रेभ्य
श्च दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतं॥२२॥ असत्कृतमर्घ्यपाद्यादिभिरनर्चितमवज्ञातम
वमानप्रयुक्तं दानं यत्तत्तामसमिति मुनिभिरुदाहृतं॥२२॥ ननु देशकालपात्रद्रव्यमंत्रतंत्रादिस्व
रूपज्ञानाभावेन शास्त्रं वैदिकं कर्म श्रद्धामात्रेण विनयैः कर्तुं न शक्यते तेन सर्वस्यापि वैदिक
स्य कर्मणो वैगुण्यमेव प्रसज्येतेत्यत्र कथमिति साकांक्षायां। विद्वान् यजत इति श्रवणात् देशका
लादिस्वरूपते न विदुष एव सर्वकर्मविज्ञाप श्रद्धया कर्तव्यं त याविपयज्ञदानतपोव्रतादौ नाम तत्व
ज्ञो न किंपमारणानामश्रद्धया वाभ्य मप्रमाद्दि नावाक्षेविततत्र मंत्रस्वरवर्णादिलोपेन वा वैगुण्ये प्राप्ते
ॐ तत्सदिति कृत्स्नं सर्वसगुणं सफलं च भवतीति बोधयितुमुपक्रमते देशः क्रियते॥२४॥ ॐ तत्सदिति
निर्देशो ब्रह्मणस्त्रिविधः स्मृतः॥ ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥२३॥ ॐ मिति ब्रह्मेति
तत्त्वमसीति सदेव सोम्येति च श्रवणात्। ॐ मिति तदिति सदिति च परब्रह्मणो निर्देशः निर्दिश्यते व
नेनेति निर्देशो नाम त्रिविधः त्रिःप्रकारः स्मृतः वेदान्तविद्भिरुद्दालकादिभिः ॐ तत्सदिति ता निश्री तिब्र
ह्मणो नामानीत्यर्थः॥ एवं नाम निर्देशं कृत्वा नाम्नो महत्त्वमाह। ब्राह्मणा इति॥ पुरा सृष्टौ
तेनोक्तेन नाम निर्देशेन ब्राह्मणाः कर्तारो वेदाः श्रौतस्मार्ताश्च सर्वयज्ञाः विहिता निर्मिताः तेभ्यः
समुत्पन्ना इत्यर्थः॥ एतेन पावकानां वेदादीनां जनिहेतुत्वात् ब्राह्मणामपि नाम्नां पवित्रत्वमुपपन्ना
मीति सूचितं। तत स्तदुच्चारणात् सर्वपापप्रायश्चित्तत्वमिति सिद्धं॥२३॥ इममेवार्थं प्रतिपादयन्नाह

णा एवं मौनीत्यत्रावएव मौनं ननु वाक्संयमनिरोधः। अन्यथापरसादीनामपि तद्भुतापत्तेः। आत्मविनिग्रहः। आत्मनो मनसो विनिग्रहः विषयेभ्यः प्रवृत्तिनिरोधनं। भावसंशुद्धिः। भाव्यतेऽर्थोऽनेनेति भावो मनः करणं तस्य रागद्वेषादिदोषसंश्लेषाभावापादनं भावसंशुद्धिः इत्येतत्सर्वं मनएकसाध्यत्वान्मानसं तप उच्यते। महर्षिभिरित्यर्थः॥१६॥ उक्तस्यैव तपसस्त्रिविधस्य सत्त्वादिगुणभेदेन त्रैविध्यमाह॥ श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः॥ अफलाकांक्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥१७॥ युक्तैरेकाग्रचित्तैः परमेश्वरभक्तियुक्तैः अत एवाफलाकांक्षिभिर्नरैः परया श्रद्धया तप्तं तत्त्रिप्रकारकं तपः सात्त्विकं सत्त्वगुणसंभावितातिश्रद्धयानिष्पादितत्वात् सात्त्विकमिति परिचक्षते कथयन्तीत्यर्थः॥१७॥ सत्कारमानपूजार्थं तपो दम्भेन चैव यत्॥ क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥१८॥ सत्कारमानपूजार्थं सत्कारार्थं मानार्थं पूजार्थं च। सत्कारः साधुरयं विद्वान् ब्राह्मण इत्याद्युक्तिस्तदर्थं। मानो बहुमानस्त्वभ्युत्थानादिः प्रयोजनार्थं। पूजा गन्धपुष्पदक्षिणादिभिः स्वहृजार्थं च। दम्भेन च [illegible] स्वधर्मप्रकाशनेन [illegible] दाम्भिकैर्यत्तपः क्रियते तत्तपः इहास्मिंल्लोके एव फलप्रदं भवतीति न साधकं देहमात्रोपयोगित्वाद् अध्रुवं तत्रापि चलं तात्कालिकफलं ऐहलौकिकमेव न [illegible] तपस्तद्राजसमिति महर्षिभिः प्रोक्तमित्यर्थः॥१८॥ मूढग्राहेणात्मनो यत्पीडया क्रियते तपः॥ परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥१९॥ मूढग्राहेणार्थानर्थस्वरूपानभिज्ञेन मूढस्य ग्राहः स्वदुराग्रहः मे वृद्धिमानिति अभिनिवेशो मूढग्राहस्तेनात्मनः शरीरस्य पीडया कायक्लेशेन यत्तपः क्रियते कायक्लेशमात्रैकप्रयोजनं। अथवा परस्योत्सादनार्थं मारणाभिचारिकक्रियया शत्रुविनाशार्थं वा यत्करोति तेन यत्तामसं तमः संभावित[illegible] श्रद्धानिष्पादितत्वात्तामसमिति उदाहृतं महर्षिभिः कथितमित्यर्थः॥

५

स्तत्वे विवक्षिते सदिदं कर्मेति सच्छब्दः प्रयुज्यत इत्यर्थः॥ २६ किंच॥ यज्ञे तपसि दाने च स्थितिः सदिति चोच्य
ते॥ कर्म चैव तदर्थीयं सदित्येवाभिधीयते॥ २७॥ यज्ञे श्रौताहोत्रे तपसि शारीरादौ दाने च कन्यादानादौ।
या स्थितिरवस्थानं सा च विद्वद्भिः सदित्युच्यते। यज्ञादीनामश्रद्धादिदोषोपपत्तौ साधुत्वसिद्धये सच्छब्दः
प्रयुज्यत इत्यर्थः॥ तदर्थीयं अत्र सच्छब्देन लोकशास्त्रप्रसिद्धः परमेश्वरो गृह्यते तदर्थीयं परमेश्वरार्थ
कं कर्म च सदित्येवाभिधीयते। अश्रद्धादिदोषप्राप्तौ यज्ञादीनां दुरापाप ॐ तत्सदिति ब्रह्मणो ना
मत्रयं प्रयुज्यत इत्युक्तत्वात् सात्त्विक्या श्रद्धयैव मुमुक्षुभिर्यज्ञदानादि कर्माणि प्रयत्नेन कर्तव्यानीति प
र्यवसितं नामत्रयात्तथात्वेतु॥ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्। असदित्युच्यते पार्थ न च तत्
प्रेत्य नो इह॥ २८॥ अश्रद्धया श्रौते स्मार्ते वा कर्मणि यदग्नौ हुतं यद्दत्तं गोहिरण्यादिकं ब्राह्मणेभ्यो यत्तप
स्तप्तं कृच्छ्रादि यत्कृतं स्तोत्रमन्त्रजपादिकं कर्म कृतं भवति तत्सर्वमसदित्युच्यते
मेव भवति। तदेव विस्पष्टयति शरीरादि वक्रप्रयासेन कृतं भक्तिश्रद्धाविधुरं प्रहत्तं कर्म प्रेत्य प
रलोके सुखाय न भवति नो इह हैहिके सुखाय च न भवति श्रद्धाविधुरं यत्नेन कृतमपि हि लोकापवादान्न
अपि नानुभवति नैव च शिष्टैरभ्यर्च्यते। श्रद्धाशून्यं कर्म नि[illegible]नमेवेत्यर्थः॥ नन्वश्रद्धया देवा
ति विधिबलाद् अश्रद्धया कृतमपि कर्म हानादिफलवद्वेदबलादिति चेत्सत्यं पश्य अश्रद्धया देपमिति
तेत यापि केवलात्फलं भवति केवलादेवेति केवलाद्विनाम हो पापिष्ठमल्पप्राप्तौ तल्लिङ्गं तपो लेशश्रद्धया
देपमिति इष्यपाशक्लोक्यते ननु विधीयते॥ पतितश्च वर्णचारी वा विधौ धीगुरुपोषकैः॥ ओंश्वगः श्रीतां
वृत्तिश्च स्यादि युगपिच्छुके पुत्रेऽन्य पुत्राद्दोषवत्सु संस्कृते न तेषु श्रोत्रिय एव श्रद्धोज्जायते तत्रापि नेह स्वीके
रणानां तेषां गतपरा भावो दश्रद्धया पिवेदातव्यमेवेत्यते॥ अश्रद्धया पादे पद्धि पादे पमिति। पथ्या मातरमा

48

रामा०

२

प्रणवस्य विनियोगमाह ॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ॥ प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादि
नां ॥२४॥ यस्मादेतन्नामत्रितयं ब्रह्मणो वाचकत्वेन वेदादिजनकत्वेन च पवित्रतममिति मतं तस्मादोमित्युदाहृ
त्य कर्मारंभे तदंते चोंकारमुच्चार्य ब्रह्मवादिनां ब्रह्म वेदाः तदर्थं च वदितुं शीलमेषामस्तीति ब्रह्मवादिनो
वेदवेदार्थपारगाः ब्राह्मणास्तेषां ब्रह्मवादिनां विधानोक्ताः विध्युक्ताः यज्ञदानतपःक्रियाः सर्वाः क्वचिदग्न्य
ध्यादीनां ऽन्यावैकल्येपि तयोरभित्युच्चारणेन सततं यथोक्तलक्षणाः संपूर्णा यथावत् यथा प्रवर्त्तन्ते प्रकर्ष
णावर्त्तन्ते प्रकृष्टाः साङ्गाः सफलाः भवन्तीत्यर्थः ॥२४॥ एवमोंकारस्य कर्मसाद्गुण्यसंपादने विनियो
गमुक्त्वा तच्छब्दस्य विनियोगमाह ॥ तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ॥ दानक्रियाश्च विविधाः क्रि
याश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः ॥२५॥ उदाहृत्येति पदद्वयोक्तिमनुवर्त्तते। मोक्षकांक्षिभिर्मोक्षैक
कामैरेतेन पूर्वोक्तानां कामित्वं सूचितं ॥ मुमुक्षुभिर्ब्राह्मणैः फलं कर्मजन्यमनभिसंधाय स्वक
र्मणो परब्रह्मार्पणबुद्ध्या चित्तशुद्धये कर्मारंभादौ तदितिपदमुदाहृत्य यज्ञरूपास्तपोदानतपः
क्रियाः श्रौतादयो यज्ञक्रियाः शारीरादयस्तपःक्रियाः। कन्यागवादिभेदेन विविधा दानक्रियाश्च क्रि
यन्ते [illegible] लोपे सति तत्पदप्रयोगेन संपूर्णाः क्रियन्त इत्यर्थः ॥२५॥ एवमोंतच्छब्दयोर्विनियो
गमुक्त्वाऽथ सच्छब्दस्य विनियोगमाह द्वाभ्यां ॥ सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ॥ प्रशस्ते
कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥२६॥ सद्भावे अविद्यमानस्य वस्तुनोऽस्तित्वं सद्भावस्तस्मिन् स
द्भावे देवदत्तस्य पुत्रोऽस्तीति तस्मिन्नर्थे यदि [illegible] सदित्येतत्पदं प्रयुज्यते [illegible] सतो ब्रह्मणो भावः सद्भा
वस्तस्मिन् सर्वस्य ब्रह्मभावे विवक्षिते सदिदमिति सच्छब्दः प्रयुज्यते। साधुभावे च सदित्येतत् असाधुभा
वस्तस्मिन्विवक्षिते असाधोः साधुभावे सत् [illegible] पामिति सच्छब्दः प्रयुज्यते। तथा च कर्मणः प्रश

म

दे

श्रितस्सर्वे जीवंति जंतवः॥ वर्त्तते गृहिणं तद्वदाश्रित्येतर आश्रमाः इति न्यायेन सर्वाश्रमिणां गृहस्थे
कपरत्वात्तद्दानमेव गृहस्थस्येति गृहिणो दानैकप्रधानत्वस्मरणाद्यथा कथंचिदर्थिभ्यो ऽ
श्रद्धया वा हि या वा भिया वा अवश्यं दातव्यमिति दानस्यावश्यकरणीयत्वं सूच्यते अश्रद्धयादेय
मित्यादिना तत्तोनापविविधिः। अन्यथा। श्रद्धया देयं। श्रद्धयाग्निः समिध्यते। श्रद्धया हूयते हविः
श्रद्धा कामस्य मातरमिति सर्वस्यापि कर्मणः श्रद्धा प्रधानत्वविधिवैयर्थ्यप्रसंगात्तस्मात् श्रौतं स्मार्तं
कर्म सर्वं श्रद्धयैव कर्त्तव्यमिति सिद्धं॥ १८॥ इति श्रीराजानकरानन्दहरस्वतिकृतौ गीतागीतातात्पर्य
दीपिकायां सप्तदशोऽध्यायः॥१७॥ श्रीपरब्रह्मणे नमः श्रीपरेशा मारा म रासर

रा मा०

दे

49

व्यासो पंच्चापः सर्वज्ञापि प्रसिद्धः एवं चिदेकरसात् अस्मात् सकाशात् उत्पन्नः संसारवृक्षस्त्रिद्रुम एव भवतीति नतः
सर्वतेतिस्त्वलेस्यादिरश्मिभिः संसारवृक्षः सबीजरसात्मक एव भवति वृक्षस्तावल्लिंव वृक्षवदिमादि
ज्ञिमिस्वनत्ऽदितस्यानुभवेन च इमं संसारवृक्षं चिदेकरसं कारणमात्रमेव यः श्रद्धात्मा पंडितो
वेद स वेदार्थवित्स्वेदस्यान्त सर्वे वेदाः पसदमामनंतीति न्यायेन सर्ववेदार्थो ब्रह्मज्ञानाद्धि कृत्स्नविदेव भवति
[illegible] येन श्रुतेनेदं सर्वमिदं विज्ञातं भवतीति न्यायेन सर्ववेदार्थोऽखिलज्ञानाद्धि कृत्स्नविदेव भवति कस्मिन्नु भग
वो विज्ञाते सर्वमिदं विज्ञातं भवतीति न्यायेन सर्वज्ञश्च भवति सर्वेज्ञस्यात्मस्यकर्तृत्वं च श्रुतिः स सर्व
विमुद्ज्जतिमामितिन्ति अतः कारणज्ञानेन कार्यस्य वृक्षस्य कारणमात्रत्वविज्ञानाद्व्वविल्लसिद्धाती
त्यर्थः॥ श्रद्धात्मन एवेच्छा प्रसादवतः कारणज्ञानेन कार्यस्य वृक्षस्य कारणमात्रत्वविज्ञानाद्वेदवो
वेदार्थवित्वं विदेहमुक्तिश्चासिध्यति मलिनात्मन तु संसारवृक्षस्वरूपं सम्यग्विज्ञायस द्युध्यानतो
विरक्त एव तत्त्वज्ञानं मोक्षश्चासिध्यतीति बोधयितुं पुनः संसारवृक्षं विशिनष्टि अधश्चोर्ध्वं प्र
सृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनु
ष्यलोके॥२॥ तस्योक्तलक्षणस्य संसारवृक्षस्य पशवः तु पशवो तोऽध्यातीपाः पापपुण्य कर्मफ
लभुजा देहाः अधश्चोर्ध्वं प्रसृताः मनुष्यादिस्थावरांतं मधः पश्वार्थः मनुष्यान्व्याप्य ब्रह्मलोक
पर्यंतमूर्ध्वं शाखार्थः अधः स्थावरपर्यंतं मूर्ध्वं च ब्रह्मलोकपर्यंतमपि प्रसृताः सर्वतो व्याप्ताः इत्यर्थः

स्यत्वादधःसप्तत्वंनेत्र अधोऽधः शाखावाऽस्य महदादयः शाखाः इव शाखा यस्य सोऽयमधःशाखः महदहंकारोऽहं
कारः खं धः पंचतन्मात्राणीत्येवाः पंचमहाभूतान्यपशाखाः अस्य भवंतीत्यर्थः यस्य महदादयः शाखा भवं
तितमधःशाखमश्वत्थं मायाकार्यत्वेन श्वोऽपि न तिष्ठतीत्यश्वत्थः क्षणभंगुरोऽनित्य इत्यर्थः तमेनं प्रणाम
ध्वंसिनमश्वत्थं संसारवृक्षं अव्ययं अपोनाशात् हितमव्ययं नित्यमिति प्राहुः प्रवोचंतो ह्निमोहिताः
कामिनो मीमांसकाः न कदाचिदनीदृशं जगदिति जगन्नित्यमिति वदंतीत्यर्थः छंदांसि संसारवृक्षस्यानित्य
त्वं सत्फलत्वामोहवतां अनर्थकारित्वादिदोषजातं छादयंतीति छंदांसि ऋग्वेदाद्यधीदक्षणानि वंतो अग्निष्टोमे
जते स्वर्गलोके नमहीयते अपाम सोमममृता अभूम अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति इत्यादीनि च
नवा वैर्गहमन्तीति छंदांसि ऋग्यजुः सामादीनि यस्य संसारवृक्षस्य मायामयस्य पर्णानि वपरणानि
वेनि पत्राणि पर्णानि सर्वतो वृक्षरक्षकाणि तस्य संततिस्तवेदाः सपत्रोऽनिति हि सः कर्मोपासनयोगाम
तत्क्रियापराः सर्वैककर्मतत्सार्धनतत्फलरूपमकाशनेनाऽनित्यत्वादि दोषं छादयंतो मुमुक्षुसंसार वृक्षं
वर्द्धयंतीत्यर्थः तमेतं प्रतिपादितलक्षणं वेद यः सात्मधर्माधर्मप्रसवजन्ममरणादिदुःखैकफलं संसारवृक्षं
मत्वा योऽवेत्यम्यग्विजानाति सवेदवित्वेदार्थविदित्यर्थः नन्वनंतजडदुःखात्मकस्य संसारवृक्षस्य
स्याघनर्थहेतोः संसारवृक्षस्य वेदमेन विदधतः कथं वेदार्थवित्वसिद्धिरिति चेत् अतः परमात्मैव जाऽसत्त्वो
वृक्षः सन्नितरत्व एव भवति यथा तिरस्कारनिर्वीजाऽसत्त्वो निर्वृक्षः स्याज्जित्यात्मक एव भवति नान्य

३

दृष्टांतरागीसंसारकोरागो निर्विषयवासनाः कर्मवासना इति पावन् अधोधश्चरसृतः तेषु चकारादू
र्ध्वं शरीरेषु लिंगाख्येषु अनुसंततानि प्रसृतानि कर्मानुरूपे गोपर्वतो व्याप्तानि भवंति मनुष्यलोके मानुषोव
गोसर्वत्र विषयेषु कामान् जनयंत्यः कर्मानुकारण्यसोभोगवासनाः लिंगेषु स्थानस्थेन तिष्ठंति ततो वास
नाः कामान् जनयंति कामाः कर्माणि प्रवर्तयंति कर्माणि सर्वतः पुनः पुनः शरीराणि उत्पादयं
त्येवं वासनाभिः कामादिभिः पुण्यपापकर्मादिभिश्च सर्वतः शरीरपरंपराभिर्बंधे येन कश्चिदपि क्षीय
ते ततः संसारवृक्षस्य रूढानां विषयवृत्तिशापाग्रावगूढा जननमरणः एवं प्रवाहपातं विना न कथं
चित्तत्क्वचित् लकर विदपि मोक्षः सिद्धगीतस्यार्थः एतेन कर्मोपासनाफलेषु स्वर्गादिसत्यलोकवैकुंठादि
षु तत्त्वलेषु चानित्यत्वबुद्ध्या असत्यत्वबुद्ध्या च मुमुक्षो वैराग्यसिद्धये मायोपाधि तत्प्रसरणः सका
शाः सत्यस्य संसारवृक्षस्य स्वरूपं धर्मावोपपश्यते तेन वारीजानां महादादिमायाकार्योपाधिकानां

S1

हिरण्यगर्भविराडादीनां त्रयाणां योपाधिकानां ब्रह्मविष्णुरादीनां भिः दर्शिनावमापिकलमनित्यत्वं नि
[illegible] चस चित्तं कर्मोपास्तितत्साधनतत्फलसमतिपादकानां वेदवाक्यानां संसारवृक्षस्वरूपत्वं वर्णने

एम

न मुमुक्षोर्वैराग्यस्य सपरिवारपेक्षितोपलक्षणचितं भवति ॥२॥ यद्यप्यधीत विद्विज्ञसर्ववेदस्ते द्वार्याः

३

पुरुषाः पंडिताः अप्यविद्याः कामपराः तत्त्वात्मवरोचनोक्तिभिः संसारवृक्षस्य फलेषु दृष्टेषु दृष्टेषु च स्वर्गा
दिषु तत्सुखेषु च अमलत्वबुद्ध्या नित्यत्वबुद्ध्या च मोहिताः एतस्मात् आत्मरामपदतः स्वयं च भ्रमंति ततो यायन्नयः

२

वाक्यस्यायमभिप्रायः स्थूलिकस्यास्य देहस्य ध्वंसे सति शुभस्य मुक्तिः स्वयमेव सेत्स्यति किं
ज्ञमयत्नेनेति न मंतव्यं संचितकर्माणि शुभस्य पापस्य क्षणान्यनंतानि विचित्राणि विचित्रफलका
नि बहूनि तान्येव नाभुक्तान्क्षीयंते कर्मेति न्यायेनास्मिन्देहेन स्थपित्वा वृणदिव्य स्वलोकपर्यंतं तत्र त
त्र पुरुषशरीराणि संभावयंति ततः ज्ञमयत्नं विना न मुक्तिः स्वतः सिध्यतीति ननु तत्कर्म फलान्युपभोक्ते
देहाः स्वयमेव क्षीयंते ततः स्वयमेव मुक्तिः स्यादेवेत्याशंक्याह न पुनः पुनः क्रियमाणकर्मभिर्बद्धत
इति सर्वचित्रमाह दृश्यमहद्भ इति शुभैः सत्वादिगुणविकारैः कामक्रोधलोभादिभिस्तत्कारणकैः पा
पापरूपादिभिस्त्रम्पर्कः प्रकर्षेण वृद्धिमान्याप्त भवतीति कामादिभिः कर्मादिभिश्चोपवर्धपरिवर्द्ध
नरस्पर्धः उपवर्धपरिवृद्धेः प्रकर्षेण वृद्धिमान्याप्त भवतीति कामादिभिः कर्मादिभिश्चोपवर्धपरि
वर्द्धनरस्पर्धः उपवर्धपरिवृद्धेः कारणमाह विषयप्रवाला इति विषयाः शब्दादयो भोग्यपदार्थाः
प्रवालाः अंकुराः पल्लवा येभ्यः संभवंति ते विषयप्रवाला भवंति शुभाः प्रवाला नीव देहान्त
रेतत्र शब्दस्पर्शरूपरसादिभोग्यपदार्थेंद्रियसान्निकर्षद्वारा संभाव्यंते ते पुण्यं द्वेषं कामं क्रोधं लोभं च वस
मुत्पाद्य पुनः पुनः कर्माणि कारयंतीत्यभिप्रायः कामादीनां कर्मणां च सिद्धेः कारणमाह अधश्चेति अ
धोन्नवंधीनि मानि काम्यनित्यनैमित्तिकप्रतिषिद्धानि नानाविधशरीरेण प्रकाराणि तान्येव कर्माणि अ
नुवध्नंति व्याप्नुवंते अनेन रूपेण वर्तंते इति कर्मानुबंधीनि काम्यकर्मसंपृक्तानि कारणानि सर्वं स्या

स्यानिःसत्वं दुःखरूपत्वमिति पदितेऽयमपि न हि न स्यः अथ दृष्टापापात्म लौकिकत्वात् किंचन कालं दुःखं सोढ्वा
न दृष्टापेक्षं सुखं भोक्तुं शक्यत इत्याशङ्क्याह नापीति अस्य जननमरणादिदुःखप्रवाहस्यान्तः स्वेनाज्ञानेन
नैमानस्यास्यादित्वनिवृत्तेर्णदिमत्त्वं नोपलभ्यते अयमस्यादिरिदमस्य मध्यमिति ज्ञातुं न शक्यत इत्य
र्थः तथैव बीजअस्यापर्यवसानमपि नोपलभ्यते इदमत्र समाप्तमिति सम्प्राप्तिरपि न विज्ञायत इत्यर्थः न
नु तर्हि मुमुक्षोः सदसद्विवेकिनः किं कर्तव्यमित्याकाङ्क्षायामाह कार्यमघङ्कवीनेतिमायेन सर्वं संसारस्य मोक्षा
यपनीतव्यमिति वोधयितुमाह अश्वत्थमिति अनेकजन्मसमारोपितं अव्ययमसाद्वनामूढ्रष्कृणाति विषयभ्र
ताश्रसंगशस्त्रेणासज्यते विषयेष्वप्रमानमनेनेति संगो वैषयिकोरागस्तदभावोऽसंगो विरागस्तीव्रमोक्षदर्शने
न विरोधप्राणां वंधकत्वदृढिजनितनिजाजेन मोक्षेच्छया विमुमुक्षुर्दुःखविवेकवलेनापि दृढमभो वतेन
दृढेनासंगशस्त्रेणाश्वत्थं ऽ विविधविषयवासनाजालानि यस्य विरूढमूलं अनेककोटिव्रलक्षा
नुस्पतनानाविधवासनायटलजटिलमश्वत्थसंसारवृक्षं समूलं छित्वा प्रभ्रान्तादिसर्वविषयेभ्यो स्वाप
सर्वसंसारसंकल्पस्यर्थः एवं सदसद्विवेकसम्भूतवैराग्यतीव्रमोक्षेच्छावेगेन पराक्रमवाहं पमानमत्तः एम
कारणं प्रमाणमित्युक्त्वोह समोक्षैककामो यतिः ततः संसारस्य अवराकुर्यादिति मायेन सद्गुरोः सन्निधौ प ४
दं परं तत्त्वं परिमार्गितव्यं श्रुतियुक्तिभिः सम्यग्विचारणीयमित्यर्थः पदार्थस्वरूपं लक्षितः तत्त्वस्य संसा
रस्यस्य पदम्प्रवृत्तिमूलकारणं परंब्रह्म नं तदेव परिमार्गितव्यं ब्रह्मविसन्निधौ सम्यग्विचार्य विज्ञातव्यमि
सदसद्विवेकविज्ञानेन च संमूलं त्रवैराग्यं नेदं नाम विषयपाशानां वंधकत्वबुद्धिजनितभयेन च
तीव्रमोक्षेच्छया

52

प॰ शुद्धात्मा विचक्षणः सूक्ष्मबुद्धिर्मुमुक्षुर्भवतीति तेन तद्यथेह कर्मचितो लोकः क्षीयते अस्मो भावं प्रमर्यस

पदं नवौ तेन तत्रैष श्लोकः प्रमाणमध्यमेन ततो संघटित्य विविनक्ति धीर इत्यादि श्रुतिभिः इदं सर्वं मिथ्या

मायाकार्यत्वात् इन्द्रजालवदित्यादियुक्तिभिश्च सदसद्विचार्य तदुदितवैराग्यवत्त्वेन संसारदुःखं संछिद्य।

तापसर्वं सम्यक् मे संक्षापयतः कर्तव्यमिति बोधयति शास्त्रान्तरपर्यालोचनेन यो पलभ्यते तन्तोन चादिने

चयप्रतिष्ठं श्रवणमनेन शुद्धिहृदयमूलमसंगशस्त्रेण दृढेनाछित्वा ॥३॥ ततः पदं तत्परिमार्गितव्यं

यस्मिन्गता न निवर्तन्ति भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥४॥ पश्चविषसंसार

वृक्षस्य पामरहृदयोक्तरित्यादि विशिष्टपदं तदुष्णयकल्पादिमत्पारमणीयत्वेनाश्रयणीयत्वं प्रतीयते

यतेत यापि पंडितैः सूक्ष्मबुद्धिभिः इत्यस्मिन्नर्थे सम्यग्विचार्य मतो ध्यायद्योऽर्वाक्शाखिवीनि स्वर्गलो

काद्यमनत्वमजनत्वमित्यादिमरोचनश्रुत्याप व्याहृपसत्त्वनित्यत्वेन सावलरूपत्वेन च वर्णितं भवति

तथा तेन प्रकारेण नोपलभ्यते नत्र प्रवाघोऽतिनतरि सादेर्नित्यत्वं श्रुतयनेकथानित्यत्वं नोपलभ्यते

इति वेदान्तेषोत्पुत्र वेणाह विपेति सा णिकस्य हविषो पिध्रुवत्वश्रवणात्तन्मायेनानुरीसादीनाम

ध्येन सत्यमस्त्वमं मायामात्रमिति यथा स्वप्नप्रपंचो यमित्यादिश्रुतिस्मृतिन्यायेन च संसारवृक्षस्य

त्वमार्थवदजिपतस्वतावत्त्वात्ते पत्याजन्मपरयादिमत्वाद्यास्यप्रम्नसे एतोपलभ्यमानस्यानित्यत्व

त्वोरूपतेवापामाणिकमित्यर्थः एतेन स्वर्गादेर्नित्य तां नि मध्रुवत्वं च वृद्धिभ्रम इति सिद्धं नत्र संसारवृक्ष

ह निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गछंत्यमूढाः पदमव्य-
यं तत् ॥५॥ मानो ऽभिमानो देहेंद्रियादिष्वहमिति मिथ्याभिनिवेशलक्षणो ऽहंकारस्तत्कार्यं मोहो ऽज्ञानमावृतिल-
क्षणो ऽनात्मन्यात्मत्वधीहेतुस्तावुभौ मानमोहौ स्वरूपज्ञानेनात्मनो वा [?] नाशपरपर्याचतां मानमोहाभ्यां नि-
र्गता ये निर्मानमोहाः श्रवणादिसमुत्पन्नेनायमहमस्मीति विज्ञानेनानात्मन्येवात्मत्वधीरवस्थया वानात्मन्य-
हंभावश्च यस्या इत्यर्थः मानमोहयोर्वक्ष्यमाणो ऽविद्याकामादेश्च निःशेषनिवृत्तौ कारणमाह अध्यात्मनित्याः
इति अध्यात्मनित्याः । अध्यात्मं आत्मज्ञानं सर्वत्र ब्रह्ममात्रदर्शनलक्षणं तत्रैव नित्या निरता आत्मारामा ये
ते ऽध्यात्मनित्याः सर्वमिदमहं च ब्रह्मैवेति यस्मिन् सर्वत्र ब्रह्मत्वमत्यमयद्र्यध्यायनिरंतरब्रह्मनिष्ठायामेव परिनि-
ष्ठिता इत्यर्थः अत एव विनिवृत्तकामाः काम्यंते विषया एभिरिति कामा वासनाः वासनया खलु विषयानका-
मयते तथा वासनानां कामत्वव्यपदेशः निरंतरब्रह्मनिष्ठया ऽन्तःकरणस्थकामादिशिष्यनिवृत्ताः कामाः
वा यद्वासना येषां ते विनिवृत्तकामाः निरंतरसमाधिनिष्ठा निर्दग्धाः कामादिसर्ववासनाग्रंथय इत्यर्थः
सर्ववासनानाशस्य फलमाह जिता इति इंद्रियाणां मनसश्च विषयैः संसर्गः संगः स एव कामसंकल्पादिदो-
षहेतुत्वाद्दोष इत्युच्यते ध्यानश्रवणदर्शनादिभिश्चित्तस्येंद्रियाणां च सति विषयसंसर्गे कामसंकल्पा-
दयो दोषा जायंते ततो मोक्षमोगपाय [?] ध्यासक्ततः प्रवृत्तिस्ततः अनर्थदर्शनविच्छित्तिस्ततो ऽधःपतनं [illegible] विषयासंग-
दृष्ट्वा ऽनर्थपरंपरां [illegible] जितो वर्जितः संगदोषो यैस्ते जितसंगदोषाः बहिरावरणपरिहिताः [illegible]

भित्यर्थः । तद्ज्ञानस्य फलमाह यस्मिन्निति परमेश्वरचरणारविन्दप्रसादं संपन्नाः यतयोऽपहतात्मानः श्रवणमननादिसं
जातविज्ञानेन यस्मिन्निति विष्णोर्वैचित्र्ये करसेवनल्लोगतनाः स्वात्मभावं गताः ब्रह्मलोकं प्राप्ताः संतोऽभयः पुनः संसा
रं पुनर्निवर्तन्ते पुनः शरीरं तापनकल्पयन्तीत्यर्थः सदसद्विवेकवैराग्याभ्यां मोक्षेच्छयावसर्वं संन्यस्य ज्ञान
सिद्ध्यै श्रवणादि कुर्वतो यतेरेवं भावेन भावमित्याह तमेवेति यतो यस्माज्जगज्जन्मादिहेतोरीश्वरात्पुराणी चि
रंतनानादिकालीनाऽपि संसारवृक्षप्रवृत्तिः प्रसृता सर्वतः प्राणिनां प्रवृत्ता स्वर्गश्चकारः पोस्यसंसारवृ
क्षस्य बीजभूतः पदशब्देनोक्तः तमाद्यं आदौ भवमाद्यं मायया सत्त्वगुणभावं प्राप्तं भक्तवत्सलं पुरुष
परमेश्वरमेव हि शरणं प्रपद्येऽहिताद्वा तत्स्वरूपेण वर्णं धारणोदर्कार्थः तेऽहं देहमात्मबुद्धिमकार्षं प्रपद्ये वैराग्य
महमपि च इति अस्य आदौ तु आत्मसदसद्विवेकविज्ञानसंजातनीव्रवैराग्यसंन्यस्तसर्वकर्मा तत्साधनानां श्र
वणादीनां संसारबंधमोक्षाय परमेश्वरमेव हि शरणं गच्छामीति ईश्वरैकशरणेन मुमुक्षुणा श्रवणादिः कर्तव्य इत्य
र्थः ॥३॥४॥ एवमविद्याकाम्यकर्मभिः संसारचक्रे भ्राम्यमाणानां त्रासेण नानापुरुषस्य ईश्वरप्रसादं सं
प्राप्य सदसद्विवेकविज्ञानसंजाततीव्रवैराग्यसंन्यस्तसर्वकर्मणां तत्साधनानां श्रवणादिजन्यज्ञानेन जगत्कारणं
निर्विशेषं परं ब्रह्म स्वात्मना ज्ञातवतां मिथ्यात्वदृष्ट्या नेत्रामे वा विज्ञातात्मस्वरूपाणां यतीनां सर्वं विमुज
तिमायां तिव स्वप्रमाणत्वात्मना पेन सञ्ज्वलज्ज्ञानस्य न तत्फलं सिद्धं इत्याप्रतिबंधायमानाऽन्तात्मतत्त्वमोक्षाय स
रहितत्वात्सर्वं दब्रह्म सिद्धयेत्स्वात्मत्वमपि तिरोधत्ते तु मे वलक्षणं संपन्नाः एवं यतयो विदेहमुक्तिं गच्छंतीत्या

६

पदशब्दार्थं परं ब्रह्म परमज्योतिः स्वप्रकाशत्वात्सर्वप्रकाशनशक्तिसंपन्नः सहस्रांशुरपि सूर्यो न भासयते न प्रका-
शयितुं शक्नोतीत्यर्थः॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निरिति श्रुतेः न शशां-
कश्चन्द्रोऽपि भासयते पावकोऽग्निरपि न भासयते च सूर्यादीनां मनसश्च ब्रह्मानवभासकत्वे इदमुपलक्ष-
णं न च चक्षुरादीनामपि भास्यं ब्रह्मेत्यर्थः न तत्र चक्षुर्गच्छति न वाग्गच्छति नेनापि वाचा नान्यैर्देवैरि-
ति श्रुतेः एतेन वह्निभौतिकस्य भास्करादेश्चक्षुरादेश्चानलवाय्वादेश्चाभास्यत्वे ब्रह्मणोऽभौतिकत्वमति-
सूक्ष्मतमत्वं सर्वान्तरत्वमन्यानवभास्यत्वं सर्वप्रकाशकत्वं अदृश्यत्वमजडत्वमप्रमेयत्वं निरवयवत्व-
निष्क्रियत्वं निर्विकारित्वं नित्यत्वं नित्यशुद्धत्वं च सिद्धं न सत्तन्नासत्सदसदिति तस्मात्तमः संज्ञापनइति
सूक्ष्मात्सूक्ष्मतरमिति एष त आत्मा सर्वान्तर इति न तत्र सूर्यो भातीति तस्य भासा सर्वमिदं विभाती-
ति श्रुत्वाप्ययं पुरुषः स्वयंज्योतिरिति स्वप्रकाशानंदघनमिति अदृश्यमव्यवहार्यमिति साक्षी चेता केव-
लइति अप्रमेयं ध्रुवमिति निष्कलं निष्क्रियमिति चिद्रूप एवाविकारोऽक्षुपलब्धेति तिनि[illegible] सुखदुःखं भक्तोऽस-

54 राम

त्यपरिपूर्णमद्वयं सदानंदं चिन्मात्रमित्यपि च श्रुतेः एवं परमज्योतिषो ब्रह्मणः सूर्याद्यभास्यत्वेनाभौतिकत्वा-
दिलक्षणस्य निसर्गपितापाद्युपक्षोतं तत्प्राप्तिपारव्यनिय म त्वेति निर्मानमोहताद्युक्तलक्षणालक्षितानां महा-

६

त्मानो यतयो यदभौतिकत्वादिलक्षणं धाम परमज्योतिःस्वरूपं पदशब्दार्थं परब्रह्मात्मत्वेन ज्ञात्वा प्राप्य न नि-
वर्त्तन्ते पुनरहं ममेति संसारे पुनरावर्त्तन्त इत्यर्थः पदादित्यादीनामभास्यं यत्प्राप्यतां तानाम पुनरावृत्तिः पदपूर्वम

र्यः यतो नित्यमध्यात्मनित्यास्ततएव निर्मानमोहास्तत एव विनिवृत्तकामास्तत एव जितसंगदोषास्तत एव सुख
दुःखसंज्ञैः सुखमिति दुःखमिति संज्ञा संज्ञानं येभ्यो जायते तानि सुखदुःखसंज्ञानि शीतोष्णप्रियाप्रियशत्रुमि
त्रादीनि द्वंद्वानि तैर्द्वंद्वैः सुखदुःखसंज्ञैर्विमुक्ताः गुणातीता इत्यर्थः एवंलक्षणा [illegible] तएवामूढाः अहंममेदमि
ति मेयमस्यपवेतो मूढस्तल्लक्षणाल्लमूढाः निःशेषनिरस्ताऽविद्याः आत्मरणाः अथमौनं वा मौनं च निर्विद्या
यथावल्लक्षणा इत्युक्तलक्षणापन्नयोगविदो अव्ययं न केनापि व्ययेति न व्ययतीत्यव्ययं नित्यं विभुं सर्वगतं सुसू
प
क्ष्मं तदव्ययमिति श्रुतेः अव्ययमित्युक्त्या निर्विशेषब्रह्मव्यावर्तितानांव्ययपः पवितः जेनसमुस्लक्षणं निर्विशेष
मेव परब्रह्म ज्ञानं मयस्मर्जन्मेवक्ताव्यमिति ज्ञापितं भवति यत्सर्ववेदांतप्रसिद्धमत्याप्यमूढाः न निवर्तंते नेदव्य
यथाख्यतं निम्पशुद्धब्रह्मसूक्ष्मस्वभावं सच्चिदानंदैकरसमद्वितीयं पदं परब्रह्मलक्षणं गच्छंति उपाधिविच्छित्याऽऽत्मा
सपरिच्छिन्नं यदितिस्वजस्वरूपं तं गच्छंतीत्यर्थः ॥५॥ नत्रुभवति हृष्टा दिलोकमाधानामपि निर्विशेषब्रह्मभाव
व
प्राप्तानामपि पुनरावृत्तिः किं न स्यादित्याशंकायां न च पुनरावर्तंते न च पुनरावर्तनादृत इति दहरा पुपासनं कृ
तवतः क्रमेणामुक्तिं गच्छतः एतलोपासकस्येव पुनरावृत्यभावः श्रूयते किमुवक्तव्यमुपाधिविलयेसा
क्षान्निर्विशेषमेव परब्रह्म सच्चिदानंदैकरसं स्वात्मभावेन प्राप्तवतो ब्रह्मविदः पुनरावृत्तिर्नास्तीतिसमर्थ
बोधयितुमाह द्वाभ्यां लक्षणः सूर्यादयः अप्यत्वं स्वयं ज्योतिः श्रुतेः सोवनिजस्वरूपलंबोधयतिन तद्भासयते सूर्यो
न शशांको न पावकः यद्गत्वा न निवर्तंते तद्धाम परमं मम ॥६॥ तन्मूर्धां जन्तुर्नो पासप्य धाम परं ज्योतिः स्वरूपं

साधनमेव भवति न तु साक्षान्मोक्ष[illegible] सिद्धानि [illegible] भवतिश्च [illegible] ज्ञानकर्मयोगयोः स्वरू
पेण रूपकमोपसंहारद्वयनाद्यो [illegible] मन्यते [illegible] निलादि [illegible] दयाय प-
[illegible] नन्तफलमिति साधनानि [illegible] फलानि [illegible] दयः तस्मैः फला-
दि साधनानीति सिद्धं सर्वमनवद्यं ॥ कालकूटसमादोषात् [illegible] गुणाभिवामकलामा-
त्रायस्य [illegible] तेषां [illegible] स्पष्टं [illegible] इति श्रीमत्परमहंसपरिव्राजकाचा-
र्यश्रीमत्तानंदात्मसरस्वतिभगवत्पादशिष्य [illegible] श्री [illegible] नंदसरस्वतिकृतौ [illegible]
बोधसारमहावाक्यदर्पणोऽध्यायः १८ समाप्तः शुभं संवत् १८ [illegible] ॥

दादित्याह व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परं योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं ७५ व्यासप्रसा
दाद्देदानीं श्रवणाराणि उरणानां चाविस्तरेकरणाद्व्यासस्य मत्कृतेः श्रीकृष्णद्वैपायनस्य प्रसादात् तदनुग्रहाज्ज्ञानेन
ज्ञानेन केरे वैनदेन छुद्दस्य विधेयमाधान्ये नलिंगनिर्देशः एतदेव मोक्षैकसाधनतान्तरमन्येन गुह्यं गोपनीयं
रहस्यमित्यर्थः योगेशेन योगमहं श्रुतवानस्मि कस्य श्रुत्वा कृष्णेन मित्याकांक्षायां योगेश्वरादिति योगानां ह
रदीनां तत्फलसिद्धेश्च कारणत्वा योगेश्वरः यद्वा योगो मायायोगः स ब्यादि तत्त्व ईश्वरो योगेश्वरः यद्वा योगो
ताने योगः आत्यंतिकसंसारदुःखनिवृत्तिकारणं तस्मिन्नुचितस्य प्रसादात्स योगेश्वरः तस्माद्योगेश्वरात्सा
स्वयं ल साक्षात्कृष्णात् देवस्य मुखेनैव कथयतः एतत् ज्ञानमहं श्रुतवानस्मि होमम भाग्यमहो गुरुप्रसाद इति स्वोत्क
र्षमाविष्कृतवानित्यर्थः श्रुत्वा किं कृतवान सौन्याकोसापा संतुष्य पोताह ७५ राजन्संस्मृत्य संस्मृ
त्य संवाद मिममद्भुतं केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ७६ पुण्यं पुण्यकरं पावनं श्रवण
पठनाभ्यां तानातां नेत्कृतं सर्वपापविध्वंसकं केशवार्जुनयोः संवादमुक्तलक्षणमिमं गीतारूपं ग्रंथं
तं मुहुर्मुहुः स्मृत्वा स्मृत्वा हृष्यामि हर्षमपार्जन्मान्तरपुण्यपुण्यकृतं कितने किंदृष्टवानजा
नेत पोरिदं संवादं संवादलक्षणं गीतारूपं स्मरतो मित्यर्थः विष्णु परमं दर्शनं ज्ञानं त्रिविगांपति
७६ तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः विस्मयो मे महान्राजन् हृष्यामि च पुनः पुनः ७७ हरेः
स्वतो साक्षात्कारमात्रेण विघातत्कार्यं च हरति तस्मिन्नेव नित्यो भावयतीति हरिः सच्चिदानंद स्वरूपः परमे

न युज्जनेनास्तस्लोकः कर्त्तुमपिस्तु तत्कर्माचरणमर्जुनस्यास्तु तस्यानुपयुक्तमेवेति चेत्तुयोक्तं सर्वं मं संबन्धाविरुद्धाः तस्य कर्मानुपयुक्त
मेवनत्याव्याधिकारिकत्वादर्जुनस्यातउपपद्यते यथाजनकादयस्सन्मनीनामुक्तानामव्याधिकारिकाणां लोकसंग्र
हचिकीर्षया कर्माचरणं तद्वदर्जुनस्याव्याधिकारिकस्य लोकहिताय कर्माचरणमविरुद्धमेव लोकसंग्रहमेवापि
संपश्यन्कर्तुमर्हसि इत्युपदेशाच्चेति ॥ ७२ ॥ इति भगवता ॥ ७२ ॥ वंधयन्तं तमनन्तसिनिधयोपते केरिथ्येवचनन्तवेतिरंगी
कृत्वादर्जुनेस्थेद्गहि विदाधिकारिकत्वनतत्वलोकहिताथं कमितं चाविरुद्धं ततोयुक्तमेवोक्तं करिष्ये वचनं त
वेति यद्भगवताऽत्र सादाभिप्रेत्य विन ष्टमोहतादरव्यानमस्मृतिलाद्यार्जुनेनाभाहृत्य भावस्तमन्त्वोमत्र
ज्ञानस्थैर्यार्थ्याविराओसमाधिकतुमिच्छयाभगवद्धतेवाद्यमवेपरित्वज्यमापरंब्रह्मैवाजत्वमनुसंधेही
त्युत्तरपयोवबाधकं सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति चरमवचनं हृदिस्थमनुवदति करिष्ये वचनं
तवेति सन्निहितत्वात्स्योपदेशस्यपरमसिद्धान्तत्वाद्विहतत्वात्विदुषः तस्याग्रेके नेत्येवंदनिकरिष्ये
वचनं तवेत्यतो नके ॥ इदं वचिरोधइति सिद्धं एवमर्जुनस्याविद्यानेन्कार्यं भ्रममर्जुनायोपदेशानस्तं तानेयाल्व
नत्र्थसमवपरिसमाप्तिं तात्वाते श्रुक्रगानदवानुभवसंज्ञानात्मानंदरसातिरेकेशस्वगुरोरनुग्रहस्तत्र निचाति
शेनुकथासंदर्भवितारमिनुचसंजयउवाचे इत्यहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिममश्रौषमद्भु
तं रोमहर्षणं ॥ ७४ ॥ सर्वमत्ताक्षिवासंपतमत्तेयवसत्ययोहिश्रुतलसरणलक्षितत्वाद्वासुदेवस्य वेदःपर
मेश्वरत्वस्य वासुदेवस्य महात्मनो महानुभावस्य पार्थस्य चार्जुनस्य इत्युक्तमकारकं संवादं श्रमनि वचनरू
पमिमं गीताग्रन्थमद्भुतमत्यन्तविस्मयकरं रोमहर्षणं मश्रुतं ॥ २ ॥ तत्वेनातिगंभीरत्वेनामेयार्थत्वेनातिलोकत्वेना
द्भुतरसत्वेन वरोमांचावहं तंपो संवादमहमश्रौषं श्रुतवानास्मिकथमश्रौषीरित्याकांक्षायां स्वगुरोः प्रसा

५६

कारणोपतस्ततो गतसंदेहः गतोऽभावे गतः संदेहः स्वजनवधो दोषः कथं शक्यते वानुवामम कृतेन कर्मणा लेपो क्ति
वानरा क ईखमात्मनो सिवान्नवे एवेइ माटिहि क्रोधेकेः स्वनत्वनि धीरणा विषयेप स्यसोहे गत संदेहः गतसंदेह इत्यनेन
विपरीतभावस्यानेत्कार्य संबंधनत्कारणस्य वनिश्चयेयनिवृत्तिस्य चित्तासतिविपरीतभावेनत्कोसरणसद्भावेव संदे
ह निवृत्त संभवात्गतसंदेहनामगत्सवं विकल्पनाशः सिद्धो भवतिश्रन्तुरूपदेशजनितवितानेन सर्वानर्थबीजमो
हे सकारणे विनष्टे मनसि संभावनात्मया यथा स्यावितानो हंगतसंदेह स्तन्न सो मपसंभावेन स्थितो स्माविदानीन्ना
येन हृष्टेनान्तर्मनस्त्वस्माल्लिंगं न किंचिदिष्टमानमस्त्य एवं भगवन्नेत्रेः मम अनन्तविषयिनतानत्वमात्मत्वं वा पोषयदतिनया
पि मदृगतेश्वरस्य वचनेनकरिष्ये नच विघातं बंधनिर्मुक्तेनानुनेनकरिष्येवचनेन तवेति पदुक्ते नंदपुरके मेव सुखं
स्वकृतेव्याऽसंभवान्न मेदमीश्वरस्य वचनकर्तव्यमितिकरणं मत्त धर्मो न तु तत्त्वधर्मः ननेन स्मात्पमीश्वरो हंतदेहं
करिष्य इति भेदज्ञानासंभवान्न स्वोहमेवेदं सर्वमिति सर्वमात्मानमेव विज्ञाननातो विदुषः स्वपमीश्वर इति वस्तेदं वचन
मनेकं करिष्य इति भेदज्ञानेन संभावेपि तु शक्यते कार्यं शेषो वा तस्य कार्यं न विद्यत इति विदुषः कृत्यनिषेधात्तो नैवा
स्तिकिंचिल्कृतेऽस्मो लिवैन्नसत्त्वं विदितिकृत्यशेषवतोऽत्र तन्नेतत्त्वस्मरणात्तु ननतो ज्ञानिन्वकर्मित्वं वैकस्यन सं
भवति परस्परविरुद्धं संमा दृष्टिमूलं वैकस्य प्रयान ह नेपथ्यमेन स्पकेन्नेष शेषः नो हि तत्त्वमेतन्न संभवति न
तु तसो मोहः स्मृतिलब्धेत्येतानिवृत्तिर्ज्ञानमात्रे स्वकेऽखिरणो ज्ञाऽन्यत्रो स्ये वतनेतत्त्वमिति वेद्य करिष्ये व
चनं तत्त्वे स्येवेनपि कंठरवेलावोन्नत्वादत्वमपि संभवति नन्विष्टोस्मि मोहमवति हि तद्बुध्यादयपावश्यघाजीभवे
ति भवतो ज्ञःहितवचनकरणं न ततस्तप्याज्ञुनस्य पुनः मेव लिवेन्नानंदात्सहस्त्रविषयत्वादाहे ८ स्वास्थ्यानुपपत्तेः

ग

१

गः नित्यं क्रियमाणकर्मणां श्रौतानामीश्वरार्पणात् तत्फलत्यागः शांतिः अंतःकरणस्य सर्वत्रोपरतिः अ
पैशुनं परोक्षे परमर्मप्रकाशनं दया भूतेषु दुःखितेष्वात्मीयादिष्व करुणा अलोलुत्वं विषयसन्निधा
विंद्रियाणां विकाराहित्यं मार्दवं चित्तस्य काठिन्यराहित्यं प्रीतलता ह्रीः लज्जा अकार्याचरणे चित्तस्य
संकोचः अप्रवृत्तिकारणं॥ अचापलं मनःइंद्रियाणां च निर्निमित्तव्यापारशून्यता॥२॥ किंच
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता भवंति संपदं दैवीमभिजातस्य भारत॥३॥ तेजस्ते
जनं बुद्धेः स्वच्छताप्रकाशः वाक्यं वा क्षमा च्युतिरविकारित्वेनागतोपद्रवसहिष्णुत्वं धृतिः धैर्यं
तिविक्षिप्ते देहेंद्रियमनोबुद्धीनां निष्प्रलत्वापादनशक्तिः [illegible] नन्वद्य तज्जडः सात्मक
स्य स्वगुणोभोमोहकतयाजन्मोयनर्थहेतोः संसारवृक्षस्य वेदनेन विदुषः कथं वेदार्थवित्वं सिध्यती
ति चेदत्र अतेयस्माद्बीजादुत्पन्नो यो वृक्षः स तु तद्रस एव भवति यथा तिक्तरसात् निंबबीजादुत्पन्नो निं
बवृक्षस्तिक्तरसात्मक एव भवति नान्यथा सोयं न्यायः सर्वत्रापि प्रसिद्धः एवं चिदेकरसात् ब्रह्मणः सकाशा
दुत्पन्नः संसारवृक्षोपि तद्रस एव भवति ततः सर्वं खल्विदं ब्रह्मेत्यादिश्रुतिभिः संसारवृक्षः सबी
जरसात्मक एव भवति वृक्षत्वान्निंबवृक्षवदित्यादियुक्तिभिश्च तद्विहितस्यानुभवेन च एवं संसा
रवृक्षं चिदेकरसं कारणब्रह्ममात्रमेव यः श्रुद्धात्मा पंडितो वेद स वेदार्थविदेव स्यात् सर्वे वे
दा यत्पदमामनंतीति न्यायेन सर्ववेदार्थो ब्रह्म तद्विदृशो विदेव भवति कस्मिन् भगवो विज्ञाते स
र्वमिदं विज्ञातं भवतीति न्यायेन सर्वज्ञश्च भवति सर्वज्ञस्य तस्य कर्तव्यं च वक्ष्यति स सर्वविद्भजति मा
मिति अतः कारणज्ञानेन कार्यस्य वृक्षस्य कारणमात्रत्वविज्ञानाद्धि न विवेकसिध्यतीत्यर्थः॥१॥ अ
ज्ञात्मन एवेश्वरप्रसादवतः कारणज्ञानेन कार्यस्य वृक्षस्य कारणमात्रत्वविज्ञानाद्धि दृष्टोवेदार्थो १

S7

रामः

श्रीगणेपतये नमः ॐ सत्वादिगुणत्रयातिक्रमणपपन्लिस्माकर्तव्यात स्वनिर्विशेषस्वपरस्य
ब्रह्मणः स्वरूपं तद्वेदनप्रकारं ज्ञानं तत्फलं च विदेहकैवल्यं प्रतिपाद्याधुना यो मामेवमसंमूढो जा
नाति पुरुषोत्तममिति स्वसंमूढस्यैव पुरुषोत्तमस्वरूपवेदनाधिकार इति अधिकारिणो योगिनो मुमु
क्षोरसंमोहत्वसिद्धये दैवसंपत्संपादनीया आसुरसंपदुर्जनीयेति संपदोरुभयोः स्वरूपप्रदर्शनाय षो
डशाध्याय आरभ्यते तत्राहौ तयोरुभयोः संपदोर्दैवसंपद एव मोक्षसाधनत्वेनोत्तमत्वाद्देतस्या एव
मुमुक्षोरुपादेयत्वाच्च प्रथमं दैवी संपदं प्रतिपादयितुं श्रीभगवानुवाच अभयं सत्वसंशुद्धिर्ज्ञा
नयोगव्यवस्थितिः दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवं ॥१॥ अभयं भयाभावः आध्यात्मि
काद्युपद्रवेषु प्राप्तेष्वपि मनसि भयराहित्यं परेषां भयानुत्पादनेन वा सर्वेशास्त्रमतत्वानिर्विचिकित्सं
सर्वकर्मानुष्ठातृत्वं वा अभयशब्दार्थः सत्वसंशुद्धिः सत्वस्यान्तःकरणस्य संशुद्धिः शुद्धतारागद्वे
षलोभमोहास्यामत्सराहंकारादिदोषानाश्रयत्वं ज्ञानयोगव्यवस्थितिः ज्ञानयोगः श्रवणमनना
दिस्तत्रैव मनसो विशिष्यावस्थितिर्व्यवस्थितिः सदा तदेकपरायणं ज्ञानमर्थिभ्यः शुद्धपापयाशक्त्या
अन्नाद्यर्थसमर्पणं दमो दृष्टेन्द्रियविषयकरणानामुपरमः चेतसो दंडनेवा दमः चकारः समुच्चयार्थः
यज्ञः श्रौताग्निहोत्रदर्शपूर्णमाससोमयागादिः चकारात्स्मार्तस्थालीपाकादिश्च गृह्यते स्वाध्यायः ब्र
ह्मयज्ञः देवपित्रादीनामुपलक्षणं तपः देवद्विजगुरुप्राज्ञपूजनादि शारीरं वाचिकं मानसिकं च व
क्ष्यमाणं त्रिविधमपि आर्जवं मनोवाक्कायकर्मसु सदैकरूपता सर्वत्र ॥१॥ अहिंसा सत्यमक्रोधस्त्या
गः शान्तिरपैशुनं दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलं ॥२॥ अहिंसा तीर्थेभ्योऽन्यत्र प्राणपऽ
हिंसनं सत्यं यथार्थभाषणं अक्रोधो नक्रोधोऽक्रोधस्ताडनपीडनाद्यपकारे ग्रहानुदयः तो

२

त्वजातस्य पुंसः असुराणां संपदासुरीं संपदमासुरीमभिजातस्य दुर्गुणजातमनोभावः सर्वथा पात्रस्य पुरुषस्य भवति
संभवतीत्यर्थः ॥ ४ ॥ द्वयोरपि संपदोः कार्यमाह दैवी संपद्विमोक्षाय निबंधायासुरी मता मा शुचः संप
दं दैवीमभिजातोसि पांडव ॥ ५ ॥ अभयसत्वसंशुद्धिरित्यादिना या दैवी संपदुक्ता सा विमोक्षाय संसारबं
धमोक्षाय भवत्यतो दैवसंपद्युक्त एवासंमूढो ज्ञानाधिकारी भवति नत्वासुरसंपद्युक्त इति सूचयन्नासुर
संपत्तेर्बंधकत्वमाह निबंधायेति दंभो दर्प इत्यादिना प्रोक्ता यासुरसंपत्सा बंधायैव भवतीति मता मया
निश्चिता न कश्चिदपि मोक्षायेत्यर्थः ॥ तत्रैवं मामासुरसंपत्तिमान्न वाप्युत दैवसंपत्तिमान्न वेति संदिहानमर्
जुनमालक्ष्य तत्संशयं परिहरन्नाह माशुच इति हे पार्थ त्वं दैवीमेव संपदमभिजातोसि तदुक्तः संसा
रान्मोक्ष्यसे मा शुचस्त्वं संशयं शोकं वा मा कुर्वित्यर्थः ॥ ५ ॥ ननु राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रि
ता इति दैवीं प्रकृतिमाश्रिता इति प्रकृतित्रयमनिरूपितं तत्कथं द्वे प्रकृती प्रोक्ते कथमेतासां निरी
परस्य कोद्वा पारार्थस्य सुधीमे वातं भवति दैवासुरी चेति प्रकृतिर्द्विप्रकारैव भवति प्रकृत्यानि प
ताय पेति दैवासुरी चाभ्यते न तदतिरिक्तेत्यत इति द्वैविध्यमेव निरूपयन्नासुरीमेव प्रकृतिं विशिष्य
प्रतिपादयति हेयत्वेन परित्यागे यथा शास्त्रविलक्षणत्वेन ज्ञातुं शक्यत इति सूचयति द्वौ भूतसर्गौ
लोकेऽस्मिन् दैव आसुर एव च दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥ लोकेऽस्मिन् संसारमंडले
भूतसर्गौ भूतानां प्राणिनां सर्गौ सृज्यते संसृज्यते गंधः पुण्यमित्यप्राणित्वेन मनुष्यत्वेनाति दृष्टी
तिसर्गः स्वभावः तौ सर्गौ प्रकृती दैव आसुरश्चेति द्वावेव नातिरिक्तोस्तीत्यर्थः तयोः सर्गयोर्मध्ये
यमिस्याहि नादैवो भूतसर्गो विस्तरशो विस्तारेण प्रोक्तो नत्वासुरस्तमसुं प्रत्याह पार्थ त्वं मे मयोच्यमानं शृ
णु सावधानो भवेति ॥ ६ ॥ तामेवासुरीं संपदं प्रतिपादयति द्वादशभिः तत्रादौ न तेषां शौचमाह ॥ प्रवृत्तिं च

58 ५८ 58 रामा० २

शौचमांतरं बाह्यं च बाह्यं मृज्जलाभ्यां देहमलापनयनं आंतरं सदसद्विवेकवित्तानेन चित्तस्य दुर्वासनाम
लापनयनं अद्रोहः द्रोहो स्वापकारिणं हंतुमिच्छा तदभावोऽद्रोहः नातिमानिता च स्वस्याति पूज्यत्वाभिनि
वेशोऽतिमानस्तदभावो नातिमानः सोऽस्यास्तीति नातिमानी तस्य भावो नातिमानिता स्वस्य प्रतिष्ठांऽनपेक्षि
त्वं च अभयादि नातिमानितांताः षड्विंशतिरेते सात्विका धर्माः दैवीं संपदं तत्र सत्वं निर्मलत्वात्प्रकाशक
मनामयमिति कृत्वा तद्विद्यते निर्मलत्वेन प्रकाशत इति देवः सत्वगुणस्तस्य संबंधिनी दैवी संपत्समृद्धि
रुत्कर्षस्तां दैवीं संपदमभिजातस्य पूर्वजन्मकृतपुण्यातिशयात्सत्वाधिक्यमभिअनुलक्ष्य जातस्य पद्
देवानां संपदं दैवीं अभिजातस्य भविष्यत्परमपुरुषार्थस्य पुरुषस्य भवंति संभवंतीत्यर्थः ॥ ३ ॥
दैवीं संपदमभिजातस्याभयादयो मोक्षहेतवः सात्विका गुणाः प्रभवंतीति प्रतिपाद्यासुरीं संपदमभिजा
तस्यैते गुणा भवंतीत्याह दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च अज्ञानं चाभिजातस्य पार्थ संपदमासु
रीं ॥ ४ ॥ वेषभाषाद्याचारादिभिः स्वस्य महत्वसिद्धये स्वेनैव कुलशीलविद्याचारमहत्वप्रकटनं दंभः
विद्यारूपकुलधनकर्मादिनिमित्तश्चित्तोद्रेकः सतामवमानहेतुर्दर्पः स्वस्मिन्नेवोत्कृष्टत्वबुद्धिरभिमा
नः परापकारनिमित्तो महाननर्थसंपादने हेतुश्चित्तक्षोभः क्रोधः परुषो निष्ठुरभाषात्मस्वभावः पारु
ष्यं चकारः समुच्चयार्थः एवकारः स्वप्नेप्यनहंकृतीतरत्वावच्छेदार्थः अज्ञानं सदसद्विवेकाभावः रि५
चकारात्कोपवेदमादयो। ज्ञानान्ताः षडेते रजस्तमोधर्माः आसुरीं संपदं रजोगुणात्मकं विद्धि तस्या
संगासमुद्भवमिति तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनामिति चोक्तत्वात् घोरकर्मकारयितृत्व
स्यासुरन्प्राणानिंद्रियाणि च रमाकर्षतीत्यसुरः रजोगुणस्तमोगुणश्च तस्य संबंधिन्यासुरी संपत्सम
द्धिरुत्कर्षस्तामासुरीं संपदमभिजातस्य प्राग्भावीयपापातिशयाद्रजस्तमोगुणोत्कर्षाधिक्यमभ्यनुस

महेतुकमेव कामहैतुकं तयोः परस्परतोप्रजातः स्त्रीकामएवकारणं किमन्यत्तोऽस्त्कारणमस्तीतिप्राहुः ॥ दृष्टं स
र्वं अदृष्टमधर्मादेरीश्वरस्य वाकारणत्वं कल्पनानप्रक्रेतिवदंतीत्यर्थः ॥८॥ एवंतेषामासुराणांप्रत्य
क्षैकमानवतांनिश्चयमुक्त्वानिश्चयस्य कार्यमाह ॥ एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ॥ प्रभवं
त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥९॥ नष्टात्मानः कामक्रोधलोभमोहादिलक्षणेन रजस्तमो
दोषेणनष्टसत्त्वगुणहितआत्माविवेकबुद्धिर्येषांतेनष्टात्मानस्ततएवाल्पबुद्धयः। अल्पेतुच्छे लगादिवि
षयभोगेबुद्धिर्येषांतेऽल्पबुद्धयः ॥ यद्वा स्त्रैमलमांसास्थिमयेदेहेऽहमितिबुद्धिर्येषांते देहमात्रा
त्मदर्शिनः। अतएवोग्रकर्माणः। उग्रंक्रूरं शास्त्रविरुद्धं देहपोषणैकप्रयोजनं परहिंसाप्रधानं कर्मये
षांते उग्रकर्माणः। अतएवोद्धसुराः ततएवाहिताः साधूनां शत्रवः स्वपंजगतोनाशायजगतःस्थिति
हेतुभूतवेदतदुक्तधर्मनाशायैवप्रभवंतिसमर्थाभवंतिनतुरक्षणायेत्यर्थः ॥९॥ जगन्नाशायकथं
भवंतीत्यतआह कामसाश्रित्यदुष्पूरं दंभमानमदान्विताः ॥ मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्ततेऽ
शुचिव्रताः ॥१०॥ दुष्पूरं वर्षशतकोट्यापिविषयभोगेनपूरयितुंतर्पयितुमशक्यत्वात् दुष्पूरंका
ममेकमेवाश्रित्य नतुधर्मादिं दंभमानमदान्विताः। दंभोबहिर्धार्मिकत्वविडंमानःस्वस्मिन्श्रेष्ठत्वा
भिनिवेशः। मदोपि धैर्यधनादिकृतश्चित्तविकारः विवेकनाशहेतुः स्वयमेतैरन्विताआसुरामोहादसति
सद्बुद्धिर्मोहोऽविवेकस्तस्मात्असद्ग्राहान्असदनर्थमेवग्राहयंतिसंभावयंतीत्यसद्ग्राहाः तान्निश्चया
न्वेदशास्त्रविरुद्धान्गृहीत्वा अशुचिव्रताः अशुचीन्यशुभान्यकरणीनानरकादीनर्थकारणानिव्र
तानिनियमाएषांतेऽशुचिव्रताम्लेच्छाजगतोनाशायप्रवर्तंते ॥१०॥ किंच ॥ चिंतामपरिमेयांचप्रल
यांतामुपाश्रिताः ॥ कामोपभोगपरमाएतावदितिनिश्चिताः ॥११॥ अपरिमेयांपरिमातुमशक्यामियत्ता

रामः

निवृत्तिं च जना न विदुरासुराः॥ न शौचं नाऽपि चाऽऽचारो न सत्यं तेषु विद्यते॥७॥ शास्त्रदृष्टे कर्तव्ये ध
र्मे प्रवृत्तिं च शास्त्रदृष्टाननर्थहेतोरधर्मान्निवृत्तिं च आसुरा आसुरस्वभावा रजस्तमोगुणप्रधाना जना
न विदुः धर्माधर्मं च न जानन्तीत्यर्थः॥ ननु सत्यं वद धर्मं चरेत्यादिश्रुतौ विद्यमानायां कथं ते धर्माधर्मे
च न जानन्तीत्याशङ्कायां तेषां तत्राप्रमाणत्वबुद्ध्या विश्वासो नास्तीति सूचयितुमाह। न शौचमिति कर्त
व्याकर्तव्यार्थज्ञानशून्यत्वेन निषिद्धरतेषु तेषु शौचं बाह्यमाभ्यन्तरं च नास्ति तथैवाचारोऽपि नास्ति व
कारात्तदुपायविनास्ति सत्यं प्रियार्थभाषणं च नास्ति तदपात् सत्यशौचरहिता आसुरा इत्यर्थः॥७॥ स्वभा
वानुरूपं तेषां निश्चयमाह॥ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्॥ अपरस्परसम्भूतं किमन्यत्का
महैतुकम्॥८॥ इत्यतः सत्यशौचरहितास्ते आसुरा जना एवं सत्यं परास्तं जगत्सर्वम
प्यसत्यमप्रामाणिकं वेदाः वेदोक्तधर्मास्तत्फलभूता लोकाश्च सर्वं मिथ्यैव इति वदन्तीत्यर्थः॥ ननु सुख
दुःखादिभेदलक्षणं जगद्वैचित्र्यं हि [illegible] तत्कारणं धर्माधर्मौ तन्मूलभूतो वेदश्च लोक
श्च सर्वं सत्यमित्येवं गन्तुं शक्यत इत्यत आह॥ अप्रतिष्ठमिति॥ प्रतितिष्ठत्यनेनेति प्रतिष्ठा कारणं
सुखदुःखादिवैचित्र्यहेतुभूतो धर्मो न प्रतिष्ठा यस्य तदप्रतिष्ठं प्राहुः न धर्माधर्मनिमित्तकं जगद्वै
चित्र्यं किन्तु वस्तुस्वभावादेव सुखदुःखादिवैचित्र्यमिति वदन्तीत्यर्थः॥ तथा अनीश्वरं च न पश्य
श्वरस्तत्सृष्टिकारणं तद्वन्नीश्वरं जगदाहुरित्यर्थः॥ नन्वीश्वरस्य जगदुत्पत्तिकारणत्वाने[illegible]कारे
कथं प्रजासर्ग इत्यत आह॥ अपरस्परसम्भूतमिति॥ अपरश्च परश्च अपरस्परमिथुनेन तस्मात्सम्भू
तमपरस्परसम्भूतं प्राहुः स्त्रीपुंसयोः संयोगाज्जगत्सर्वं जातमिति वदन्तीत्यर्थः॥ ननु तयोरपि प्रेरकं नि
मित्तकारणमीश्वरोऽभ्युपगन्तव्य इत्यत आह॥ कामहैतुकमिति॥ प्रजासर्गे काम एव हेतुर्यस्य तत्का

त

भावोऽज्ञानं तेन विविधं मोहिताः मोहं प्राप्ताः ॥१५॥ एवं कामसंकल्पैः विविधभावापन्नानां कामपराणां तत्प्रवृत्तेः
फलमाह ॥ अनेकचित्तविभ्रान्ता मोहजालसमावृताः ॥ प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६॥ अ
नेकचित्तविभ्रान्ताः इदमद्य मया लब्धमित्येवंरूपैरनेकविधैश्चित्तविकारैर्विभ्रान्ता विविधं भ्रान्ताः । मोह
जालसमावृताः । मोहः सदसद्विवेकाभावः स एव जालं मत्स्यानामिवावरणात्मकं नाशकत्वात्तेन समावृ
ताः तिरोहितविवेकास्तत एव कामभोगेषु विषयसेवायामेव प्रसक्ताः प्रकर्षेणासक्ताः परिनिष्ठिता नक्तं
दिवं ध्यायन्तस्तत्र वाशुचौ श्लेष्ममूत्रपुरीषादिरूपत्वादशुद्धे नरके रौरवादौ पतन्ति ॥१६॥ ननु तेषामपि
ब्राह्मणत्वेन श्रुताध्ययनाध्यापनसंभवाद्वेदोक्तकर्मानुष्ठानसंभवाच्च कथमेतेषां वैदिकानामशुचिन
रकपात इत्याशंकापनोदाय ॥ अद्य पाप्मिः समित्यत इति यो वा एतदक्षरं गार्ग्यविदित्वास्मिंल्लोके जुहोति यजति
श्रुतेः कर्मणोऽपि भावात्तैरविधिना क्रियमाणत्वेन तेषामीश्वरः प्रीणाति तन्निष्फलमेवेति न्यायेन तेषा
तेषामासुराणां नरकप्राप्तिरेव सिद्धमिति प्रतिपादयति द्वाभ्यां ॥ आत्मसंभाविताः स्तब्धा धनमानमदा
न्विताः ॥ यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकं ॥१७॥ धनमानमदान्विताः ॥ मानो गर्वः । मदो म
त्तता । धनेनोत्कर्षसमुत्पन्नौ मानमदौ ताभ्यां समन्विताः तत एवात्मसंभाविताः आत्मनैव न तु क्वा
पि शिष्टैः संभाविताः बहुमताः स्तब्धा एव स्तब्धा उद्धताः नम्रतारहितास्ते आसुरा नामयज्ञैर्नाम्ना
यज्ञैर्न तु वैदिकक्रियाकलापैः राजनवाजिनादिभिर्यजनैरविधिपूर्वकं निपतकालमन्त्रहोमविविध
जितं दम्भेन स्वमहत्वप्रसिद्धये यजन्ते न त्वीश्वरप्रीतिसिद्धये ॥१७॥ किंच ॥ अहंकारं बलं दर्पं कामं क्रो
धं च संश्रिताः ॥ मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥१८॥ अहमेव कुलशीलसंपन्नः सर्वशा
स्त्रपारगः सर्वज्ञो धर्मिष्ठः सर्वोत्तम इति येन स्वगुणोत्कर्षं मन्यते सोऽहमवशाहंकारस्तं बलं कामरागा

रामा० ४

(रिमे यांच प्रलयांतामुपाश्रिताः॥ कामोपभोगपरमा एतावदितिनिश्चिताः ११ अपरिमेयां) प्र०स्तामित्यर्थः। प्र
लयांतां प्रलयपर्यंतं मरणमवधिर्यस्यास्तां मरणावधि कामिंतां भोगयसोऽस्तु वाऽसोऽस्तु वसिध्यासिध्या
लोच्च नरूपामाश्रिताः कामोपभोगपरमाः काम्यंत इति कामाः भोग्यपदार्थास्तेषामुपभोग एव परमः नि
रतिशयः पुरुषार्थः पुरुषत्वसिद्धेः फलं येषां ते कामोपभोगपरमाः एतावदितिनिश्चिताः पुमानजनितावम
रणांतं सम्यग्विषयाननुभुंक्त इति यत्वेतावदेव पुंजन्मनः फलं देहपातसेवमोक्षत्वात्नातःपरं मंफलमितिनि
श्चितं सिद्धांतो येषां ते एतावदितिनिश्चिताः सतः कामभोगार्थमीहंत इत्युत्तरेणान्वयः ११ किंच॥ आशा
पाशशतैर्बद्धाः कामक्रोधपरायणाः॥ ईहंते कामभोगार्थमन्यायेनार्थसंचयान्॥१२॥ आशापाशशतैर्ब
द्धाः आशा अप्राप्तार्थाभिलाषास्ता एव पाशाः बंधनरज्जवस्तेषां शतैर्बद्धाः कामक्रोधपरायणाः आसुराः
कामभोगार्थं कामानां स्त्र्यादिविषयाणां भोगार्थमेव न तु दानार्थं नापि धर्मार्थं च किंतु विषयानुभवा
य एव अन्यायेन शास्त्रविरुद्धमार्गेण कपटवचनादिरूपेणार्थसंचयान् संपादनानीहंते कुर्वंतीत्यर्थः १२
अन्यायेनार्थसंपादनपराणामासुराणामीहृदृये संकल्पप्रकारमाह त्रिभिः॥ इदमद्य मया लब्धमिमं प्रा
प्स्ये मनोरथं॥ इदमस्तीदमपि मे भविष्यति पुनर्धनं॥१३॥ स्पष्टोऽर्थः॥१३ असौ मया हतः शत्रुर्हनिष्ये
चाऽपरानपि॥ ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी॥१४॥ ईश्वरो विघ्नाधनादिभिः समर्थः। सि
द्धः पुत्रैः पौत्रैः पश्वभिर्धनधान्यैः संपन्नैः कृतकृत्यः। शिष्टं स्पष्टं॥१४॥ आढ्योऽभिजनवानऽस्मि कोऽ
न्योऽस्ति सदृशो मया॥ यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः॥१५॥ आढ्यो वस्त्रधनसंपन्नः। अभिज
नवान् कुलीनः प्रक्षेप्रतिष्ठार्थं धनार्थं जीवनार्थं वा यागं करिष्यामि। दास्यामि स्तावकेभ्यो नटविटादिभ्यो
नतु श्रोत्रियेभ्यो वैधुम्यश्च। मोदिष्ये हर्षमुत्कर्षं संतोषं प्राप्स्यामि इत्येवं तेऽज्ञानविमोहिताः सदसद्विवेका

मर

कादियोनिमपिप्राप्नुवंतीत्यर्थः। प्रवृत्तिं च निवृत्तिं च जना न विदुरित्यारभ्य ततो यांत्यधमां गतिमित्यंतेन ग्रंथे
न रजस्तमोदोषबहुलितांतःकरणानामासुराणां या संपत्तस्याः फलमधोधःपतनं विनाकेनचिद्दर्शितं श्रेयःप्रा
प्तिर्यस्मान्नास्ति तस्माद्बुद्धिमान् सदसद्विवेकी पुरुषः पुरुषत्वसिद्धेः साफल्याय स्वयं विवेकं श्रेयः
हेतोर्दुर्योनिप्राप्तेः एवंभूताया आसुरसंपत्तेर्विषयोग्यत्वात् सदसद्विवेकवैराग्याभ्यां परमपुरुषार्थोपपत्ति
तेऽयमिति सूचितं भवति तेनासुरसंपद्धर्मा ये वर्जनीया इत्यभिप्रायेति सिद्धं ॥२०॥ प्रतिपादितायास्त्वासु
रसंपत्तेः सर्वस्वमत्रैव पर्यवसितमेतत्त्रितये परित्यक्तेऽपि धानमल्लनिवर्हेत्तान्यायेन आसुरी संपत्सर्वापि
परित्यक्ता स्यात् ततो मुमुक्षोरवश्यमेतत्त्रितयं परित्याज्यमेतत्त्यक्त्वा स्वधर्मैः श्रेयःसाधनमनुतिष्ठतः पु
ंसः परमपुरुषार्थः सिध्यतीति प्रतिपादयति द्वाभ्यां ॥ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ॥ कामः क्रो
धस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥२१॥ नरत्वेनोक्तं दृष्टजन्मवतां नराणां निरतिशयमकं दुःखं परत्रत
न्नरकं मृन नरकस्रक्कराहि नीचयोनिः नरकमिति शाकं धाहिकरूपं ॥ तस्य नरकस्य प्राप्तिं दृष्टयो
निरूपस्य प्राप्तेः कामः क्रोधो लोभ इति त्रिविधं त्रिप्रकारकमेव द्वारं प्रवेशमार्गः ॥ नैवेतादृशं
रमस्मदादीनां नत्यर्थः। ननु कामादीनां नीचयोनिप्राप्तिद्वारकत्वमस्तु ततः को नो हानिरित्याशंक्या
माह ॥ नाशनमिति ॥ आत्मनः तरोते क इति तत्पुराणतिशयानामनुभव त्वपुरुषत्वब्राह्मणत्ववेदाधी
तिमत्वविवेकित्वलक्षणानां मोक्षसाधनमारूढस्यात्मनः स्वस्याधिकारिणो मुमुक्षोः कामादित्रयमे
तत्पुरुषार्थस्य नाशकं भवति धर्माधर्मकर्तव्याकर्तव्यार्थानर्थबंधमोक्षविवेकविज्ञाननाशयती
त्यर्थः ॥ नहि कामाकुलस्य क्रोधाविष्टस्य वा लोभग्रहग्रस्तस्य वा धर्माधर्मादेर्मोक्षविवेकविज्ञानं नाश
यतीत्यर्थः ॥ नहि कामाकुलस्य क्रोधाविष्टस्य वा लोभग्रहग्रस्तस्य वा धर्माधर्मादेर्विवेकविज्ञानं भ

ऽनं दर्पं दृप्ततां कामं क्रोधं च चकारान्मोहलोभमात्सर्यादिबुद्धिदोषान् संश्रिताः आत्मपरदेहेषु आत्म
देहे परदेहे षु च मामात्मानं प्रत्यक्षं द्विषंतः प्रमाते चीमित्वमनंगीकृत्य मां द्विषंतः । पद्यं ॥ आत्म
नो मम देहादिव्यतिरिक्तत्वं नित्यत्वं चैतन्यमात्रत्वमकर्तृत्वमभोक्तृत्वं प्रकर्षेणाद्विषंतः तत एवाभ्यसूयकाः
आत्मनो देहव्यतिरिक्तत्वनित्यत्वैकत्वदर्शीत्वाविक्रियत्वबुद्ध्यादिनाः सत्सु रूपाणां गुणेषु दोषारोपकाः लोकेऽप्य
सुरा दुराचाराः प्रभवंति ॥ १८ ॥ तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ॥ क्षिपाम्यजस्रमशुभानासु
रीष्वेव योनिषु ॥ १९ ॥ मां द्विषतः स्वदेहपरदेहेषु मामात्मानं द्विषतः तत एव क्रूरान् क्रूरकर्मिणः शौचाचारसम
शौचाऽऽचारभ्रष्टानशुभानशुभाचारनिरतानत एव नराधमान् तानासुरीष्वनिरंतरं संपद्विशिष्टा
नेजनान् तत्कृततुल्यकर्मभिः संसारमार्गेषु । पद्यं । संक्षिपंते भुंजते तरंति संसाराज्जननमरणादिलक्षणात् तेषु
नु मार्गेषु सत्सु तदनुभूतये आसुरीष्वेवातिक्रूरासु श्वसूकरसर्पव्याघ्रादियोनिषु क्षिपामि तत्कर्मानुरूपा
मेव श्वनकादियोनिषु मजस्रं पुनः पुनः प्रापयाम्यहमीश्वरो मदाज्ञाछेदिनो मनानिलर्थः ॥ १९ ॥ ननु श्व
नकादियोनिषु प्रवेशितानामपि तेषां बहुजन्मनामंते मोक्षः स्यादेवेत्याशंकायां न इमा तिष्ठद्राप स
क्लिष्टावतीनिमूतानि भवंति । जायस्व म्रियस्वेति अवराणां दुर्विदुराचारनिरतानां पापिष्ठानां तेषां पुनः पु
नः जननमरणे विनानक दाचिदपि मुक्तिरस्तीत्याह ॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि
मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिम् ॥ २० ॥ अनेकचित्तविभ्रांताः कामभोगप्रसक्ताः अशुचिव्रता मूढाः
स्वकोपद्रकातिशयादेव जन्मनि जन्मनि प्रतिजन्म आसुरीमेव योनिमापन्नाः संतो मामप्राप्य अत्र मामि
ति मच्छब्देन स्वप्राप्तिसाधनं लक्ष्यते मां मत्प्राप्तियोग्यमानवदेहमप्राप्यैव ततो यासु योनिषु पतितास्ताः
धमां निकृष्टां क्लिष्टां पापां तामिस्रां पैशाचीं वा गतिं गच्छंतीति गतिस्तत्र यांति नानु तामेव पुनः पुन

६ शास्त्रनियममुल्लंघ्य स्वेच्छानुरूपं सृष्ट्वा विधुरं धर्मानुष्ठानं यः करोतीत्यर्थः ॥ स कामाधनप्रवृत्तिः पुरुषः सिद्धि
मविधिनाकृतत्वात्तैः कर्मभिश्चित्तशुद्धिं नाप्नोति चित्तशुद्ध्यभावे कर्मणः फलाभावस्य भावित्वनियमात्तथैव स्वर्गादिकं च
सुखेन प्राप्नोति कर्मणां मुक्तिसाधनत्वात्परां गतिं मोक्षं चापि नाप्नोति य एवमविधिना कर्म कुर्वाणः स्वर्गापव
र्गाभयभ्रष्टो भवतीत्यर्थः ॥२३॥ शास्त्रविधिनैव कर्मणां कर्त्तव्यत्वं निर्धारयन्नध्यायमुपसंहरति ॥ तस्मा
च्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि ॥२४॥ यस्माद
शास्त्रीयाणां कामैकनिवं[illegible]धिनानां कर्मणां फलाऽभावो निश्चितस्तस्मात्ते मुमुक्षोः कार्याकार्यव्य
वस्थितौ कर्तव्याकर्त्तव्यार्थयोर्व्यवस्थापने इदमेवमनेन कर्त्तव्यमिदं तु न कर्त्तव्यमित्येवमनुष्ठेयप्र
ननुष्ठेयार्थनिर्णये श्रुतिस्मृतिलक्षणमेव शास्त्रं प्रमाणं तत्तदर्थप्रमापकं देशकालमन्त्रतन्त्रदेव
ताद्यक्तिगादिज्ञानस्य हेयपदव्यक्तानस्य च कारणमित्यर्थः ॥ यत एवं ततः कर्मभूमौ कर्माधिकारी
दैवसंपद्यापरित्यक्तकामादिदोषस्त्वमधीतविदितवेदवेदार्थः सन् ज्ञात्वा शास्त्रविधानोक्तं शास्त्रवि
त्वा धिदृष्टमेव कर्म तन्मम मेदं शास्त्रीयं कर्म कर्त्तव्यमिति शास्त्रतो विज्ञाय वैदिकं कर्म कर्त्तुमर्हसि नाश
स्त्रीयं कर्म फलवैतृष्ण्यापत्तेरित्यनेन स्ववर्णाश्रमोचितं कर्म शास्त्रेण विज्ञाय मुमुक्षुणा कर्त्तव्यमिति सिद्धं ए.मा.
॥२४॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानंदानुभवसरस्वतीशिष्यश्रीमच्छंकरानंदसर २
स्वतिकृतौ गीतातात्पर्यबोधिन्यां षोडशोऽध्यायः ॥ १६

62

वतितद्भावेपुरुषोविनश्यत्येवमनुष्यत्वाद्युत्कृष्टमोक्षसाधनसंपन्नामोक्षसौधांतमारूढोपिप्रमादेनतालात्रू७
इवकामादिभिरधःपातितःसन्निःशेषंविनश्यतिनहिशत्रुभ्यापतितस्यस्वरूपनाशंविनाकिंचिच्छेषंसिध्यत
तएवोच्यतेनाशनमात्मनइतिप्रस्मादेवंकामादीनांप्रभवास्तस्मान्मुमुक्षुर्विवेकसंपन्नस्तत्स्वभावंज्ञात्वात्साऽ
११४ विनाशायचंडालमिवकाममेकं [illegible]सर्पमिवक्रोधंमलमिवलोभंचैतत्त्रयंहरतस्त्यजेत्तेनतेषांतोचरोभवे
दित्यर्थः॥२१॥एवंकामादीनामधर्मप्रवृत्तिहेतुतयानरकद्वारकत्वंमुमुक्षुत्यागसंपत्त्येवप्रतिपाद्यचे
तैर्विमुक्तःश्रेयःसाधननिष्ठोभूत्वाश्रेयःप्राप्नोतीत्याह॥एतैर्विमुक्तःकौंतेयतमोद्वारैस्त्रिभिर्नरः॥आ
चरत्यात्मनःश्रेयस्ततोयातिपरांगतिं॥२२॥नरोमुमुक्षुरधिकारीब्राह्मणादिर्विद्वानंतमोद्वारैस्त
मसोनरकस्यद्वारैर्द्वारभूतैस्त्रिभिर्विधैरेतैःकामक्रोधलोभैर्विमुक्तोविशिष्यनिर्मुक्तःसन्नात्मनःस्वस्यश्रे
यःसाधनंस्वाधिकारानुरूपंस्वाश्रमोचितंधर्मंवैदिकंवाश्रवणादिकंवापरश्चाचरतिसम्यगनुतिष्ठतिततस्ते
नैवानुष्ठानेनचित्तशुद्धिद्वारासमुत्पन्नात्मज्ञानेनपरांगतिंविदेहमुक्तिंयातिगच्छतीत्यर्थः॥२२॥एवंदंभ
दर्पातिमानाद्यासुरसंपत्तिमतांवेदशास्त्रविधिमुल्लंघ्यतद्विरुद्धधर्मानुष्ठानस्यतत्फलप्रदातारंचापीश्वरम
नादृत्यपरेष्टकासोपभोगपरस्वहरणादौचप्रवृत्तानांपापिष्ठानांपुनरासुरीष्वेवजातिष्वधःपतनंप्रति
पाद्यस्वाऽज्ञाऽनुल्लंघनापुनरपियएवमेवप्रवर्त्ततेसोप्यधोलोकमेवगच्छतिनमुक्तिंवात्रीस्वप्नेपिविंदती
फलमेवार्थेदृष्टंपति॥यःशास्त्रविधिमुत्सृज्यवर्ततेकामकारतः॥नससिद्धिमवाप्नोतिनसुखंनपरांगतिं
॥२३॥यःश्रुताध्ययनसंपन्नोब्राह्मणादिरधिकारीशास्त्रविधिंविशिष्यतेऽहर्वोबोध्यतेऽनेनेतिवि
धिः।अग्निहोत्रमीपयज्ञमालभेत।नकलंजंभक्षयेदित्येवंकर्त्तव्याकर्त्तव्यप्रकाशकंशास्त्रविधिंवो
दनाविधिनिषेधवोऽस्त्यपाविचार्यशास्त्रविधिमुपेक्ष्येत्यर्थः॥कामकारतःकामनयाप्रवृत्तवर्तते

नावस्थितिं विनाशनं तदुत्क्रमणं न संभवतीत्यर्थोऽविद्यादिमतः तथा च श्रुतिः । गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति योऽ-
कामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येतीति पर्याप्तकामस्य कृता-
त्मनस्त्विहैव सर्वे प्रविलीयन्ति कामा इति यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा
विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति च कूटस्थत्वादात्मनो निर्गमागमायोगाद्वा यथा
महाकाशस्यैव सतो घटाकाशस्य घटोपाधिनाभिन्नवत्प्रतीयमानस्य घटनाशे स्वरूपेण महाकाशात्मनाव-
स्थितिर्विनाशनं वृत्तिर्न संभवति तथा ब्रह्मण एव सत आत्मनोऽप्यविद्योपाधिनाभिन्नवत्प्रतीतस्योत्तरी-
त्यात्मविद्यातत्कार्यविनाशे स्वरूपेण ब्रह्मात्मनावस्थितिर्विनाशनं वृत्तिर्न संभवति कूटस्थत्वात् क्रियाश्र-
यत्वाच्च यपञ्चेर्यन्ततः सम्यग्दर्शनेन ब्रह्मनिष्ठया चाविद्यादिविनाशादुपाधिविलये निर्विशेषनिमग्नब्र-
ह्मभावं गतानां यतीनां महात्मनां नास्ति पुनरावृत्तिरिति सिद्धं ॥६॥ एवं संसारवृक्षस्य स्वरूपं ज्ञात्वा विरक्तस्य स-
दसद्विवेकिनो मोक्षैककामनया सम्यक्सर्वकर्मत्यागिनः सद्गुरुप्रसादजन्मज्ञानेन ब्रह्मभावाप्तिमपुनरावृत्तिं च
प्रतिपाद्याधुनाऽहंकृत स्वबलो नामैवं यतीनामनात्मन्यात्मत्वभ्रमनिःशेषनिवृत्तये ब्रह्मण एवाविद्योपाधि-
वशाज्जीवत्वमिति बोधयितुं जीवस्य ब्रह्मांशत्वमात्मनो देहेन्द्रियादिव्यतिरिक्तत्वमविक्रियत्वमसंसारित्वं च प्र-
तिपादयति त्रिभिः ममैवांशो जीवलोके जीवभूतः सनातनः । मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥७॥
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः । गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ ममैव निर्विशेषस्य विदे

63

एम

नपरमनंतरमेवात्मस्वमखंडानंदैकरसमद्वितीयंतद्धामपरंज्योतिर्मभविश्नो नैजंतत्वममायिकं स्वरूपमित्यर्थः न
नुसोम्येमाः सर्वाःप्रजाः सतआगम्यनविदुः सतः आगच्छामहइतिसत्संपन्नानामपिपुनरावृत्तिः श्रूयते क
थ्यमपरत्वान्निवर्त्ततइति सत्संपन्नानांपुनरावृत्त्यभावप्रतिपाद्यतइति चेन्नसमसत्संपन्नानामपिश्रुत्याप्यवि
सतःपुनरावृत्तिरुच्यतेनत्वापि नत्वविशेषोस्तिसउअतेप्रयतो वाङ्मनसीसंपद्यतेमनःप्राणेप्राणस्तेजसि
तेजःपरस्यांदेवतायामितिविद्वद्विदुषोरुभयोरपिसत्संपत्तौसमानायामप्यविद्याकामादेःसंसारबीजवि
शिष्टत्वाद्विद्वान्सत्संपद्यापिसंसारहेतोरविद्यादेर्विद्यमानत्वात्तद्योगेनसतःपुनरुत्क्रामतितथाचश्रुतिः
तेनैषआत्मानिष्क्रामतिचक्षुष्टोवामूर्ध्नोवान्येभ्योवाशरीरदेशेभ्यस्तमुत्क्रामंतंप्राणोऽनूत्क्रामतिप्राण
मनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतिसविज्ञानोभवतिसविज्ञानमेवान्ववक्रामतितंविद्याकर्मणीसम
न्वारभेतेपूर्वप्रज्ञाचअविद्यांगमयित्वान्यन्नवतरंकल्याणतरंरूपंकुरुतेपित्र्यंवागांधर्वंवादैवंवाप्राजाप
त्यंवाब्राह्मंवान्येषांवाभूतानामितितेनदेवसक्तःसहकर्मणैतिलिंगंमनोयत्रनिषिक्तमस्येतिकामानयःका
मयतेमन्यमानःसकामभिर्जायतेतत्रतत्रेतिपुण्यःपुण्येनकर्मणाभवतिपापःपापेनेतिनाभुक्तंक्षीयते
कर्मेत्यादिस्मृतिभ्यश्चततोऽविद्याकामादिवत्त्वेनशेषकर्माज्ञत्वेऽप्यविद्याकामादिमतोऽनात्मज्ञाःसत्संपद्या
पिपुनरावर्त्ततेयथासुषुप्तेनतथात्मविज्ञमोपवर्त्ततेसदेकत्वविज्ञानाग्निनाऽविद्याकामादेर्निःशेषद
ग्धत्वादुपाधिविलयेब्रह्मस्वरूपमेवनिर्विशेषंसंनिमज्जतिस्वरूपंप्राप्यवतोब्रह्मविदःपुनर्व्युत्थानहेतोरभावाद्ब्रह्मात्म

पद्यनेन घटब्रह्मणोऽप्येकस्याप्यविभागस्तथाप्यपितत्र घटाद्युपाधिवैशिष्ट्यात्तदवच्छिन्नस्यांशत्वं कल्प्यपि
त्वाजीवोऽमांशांशत्वं धृतिब्रह्मणएकस्यैवांशांशिभावः कल्पितउपपद्यतेनतु वस्तुतो लोके स्फुटत्वेनत्वात्त्वे
त्वड्दीरितदोषः प्रसज्येत अतिविरोधस्य स्यात् इत्याभावाल्लकाचिदप्यनुपपत्तिः पनल्लनो ब्रह्मणएवउपा
धिविशिष्टस्य जीव इति व्यपदेशः यथाग्रेर्बलेहानुवर्तियोगेन दीप इति व्यपदेशः लब्धनन्वसंगस्य ब्र
ह्मणः कथमुपाधिसंबंधः कथं वा विकारित्वमिति चेद् अत एव आत्मसंगस्यैव शांतस्यानेनात्रस्यापीतिमा
संबंधस्याध्यासिकत्वेनैव धीतः शांत इति पीतत्वं चासिध्यतीति तद्ब्रह्मणोऽप्युपाधिना संबंधः आध्यासि
कत्वेनैवात्माकर्तोतिभुंजइति संसारित्वं चासिध्यत्यात्मन आध्यासिकं जन्मवाल्यवृद्धापत्तीवलेलाप
तीवेतिश्रवणात् इममेवाध्यासिकं संसारमात्मनः प्रतिपादयति मनःषष्ठानीन्द्रियाणि कर्षतीति श्लोकद्वय
स्याप्यर्थपदान्यूपेक्षकमतेनार्थोवर्णनीयः सनातनः ब्रह्मत्वात्सनातनो नित्यस्तनएवेश्वरः देहेन्द्रिया
दिः यदेहाद्देहान्तरं व्याप्नोति जीवः च यत्र वा अपि वा अर्थः पजुयदा तु वाउत्क्रामत्यथयानदेहान्निष्क्रामति तदामनः
षष्ठानीतिमनः षष्ठं येषां तानि मनःषष्ठानीन्द्रियाणि श्रोत्रस्पर्शादीनि वागादीनीन्द्रियाणीति प्राणानामप्यु
पलक्षणं प्राणाः अप्रकृतिस्थानि स्वाज्यदेहनिष्ठानि कर्षं माकर्षतिप्रासन्नशरीरे विषयोपभोगार्थं
गृह्णातीत्यर्थः एतच्छरीरं यच्छरीरं प्रत्पदाऽवाप्नोति तदा वाप्युत्क्रामतीशः पात् पुष्पस्थानात् गंधान् गंध
वत्कुसुमावयवान् आत्तिसूक्ष्मानिवएतानिमनःप्राणोमयेन्द्रियाणि गृहीत्वा संयाति शरीरांतरं गच्छतीत्य

कारस्य ब्रह्मणोंऽश इवांशोऽविद्याकल्पितो भागः जीवलोके संसारे यद्वा जीवन्ति लोकान्तेऽनुभवन्त इति जी
वलोकः क्षेत्रं तत्र जीवभूतः नामरूपव्याकरणाय क्षेत्रज्ञतां गतः सनातनः प्रमाणाभावात् नित्य इत्यर्थः ननु निरवयव
स्य निर्विशेषस्य परस्य ब्रह्मणोंऽशो जीव इत्यंशांशित्वकल्पनानुपपत्तेः सांशत्वे सावयवत्वमनित्यत्वं सद्वि
तीयत्वं च स्यात् निष्कलं निष्क्रियमिति एकमेवाद्वितीयमित्यादिश्रुतिविरोधश्च स्यादिति चेन्न त्वमत्रेदं ह
ष्टः त्वया किं ब्रह्मणोऽन्यः कश्चिज्जीवो न जीव इत्युच्यते उत ब्रह्मण एव जीवत्वमुच्यते वा किं वा जीव एव नास्ती
त्युच्यते न तावत्तृतीयः नैवाहमस्मीति निश्चयो विद्यमानस्याभावप्रसंगात् दृष्टापलापे वेदविचेन्न प्रत्यक्षविरोधा
पत्तेः आद्ये स चेतनो वा किमचेतनो वेति न द्वितीयः अहं ममेदमिति तेन वेदज्ञानाभावप्रसंगात् न सुषुप्तिव
त्सर्वदा सर्वत्र व्यवहारलोपप्रसंगाच्च नाद्यः स्याची चेतनाकेवलत्वमिति ब्रह्मणः एवं चेतनत्वश्रवणात् नेदानीं जन्म
स्य चेतनत्वायोगात् न हि ब्रह्मण एव जीवत्वमिति चेन्न सर्वस्यापि प्राणिमात्रस्य ब्रह्मैवाहमिति प्रत्यक्षत्वात् स
र्वसाक्षित्वज्ञानप्रसंगात्संसाराभावप्रसंगाच्च तथात्वे मतस्य स्यादिसर्वप्रमाणविरोधप्रसंगान्न हि द्वितीयः अवि
द्यापाब्रह्मण एव जीवत्वमिति चेन्न मायाया अप्रमेयत्वात् योगमायासमावृत इति भगवतोक्तत्वात् ममैवांशो
जीवलोके जीवभूतः सनातन इति ब्रह्मण एव तत्त्वविद्याजीवत्वं तथापि निरवयवस्यैकस्यैव ब्रह्मणः कथमंशां
शिभाव उपपद्यत इति चेदविद्योपाधिनायं भवति पश्य निरवयवस्यैकस्यैव महाकाशस्य घटोपाधिवैशि
ष्ट्यान्घटाकाशत्वं कल्पयित्वा घटाकाशो महाकाशांश इत्येकस्यैव महाकाशस्यांशांशिभावः कल्पित उप

तं विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः ॥१०॥ आत्मनो याथात्म्यं स्वरूपं द्वितीयपद्यस्यार्थः उत्क्रामंतमित्यादि
कार्यकृत्स्थूलपराच्छति सति आपतीव चलेत्यायती वेति न्यायेन स्वपञ्चत्क्रामंतेगच्छंतमिव प्रतीयमानं स्थितं सति स्थि
तमिव भुंजाने सत्य पि भुंजानमिव गुणान्वितेतरैः सत्त्वादिगुणविकारैः सुखदुःखकाम क्रोधमोहभयादिभि
रन्विते सति स्वयमपि गुणान्वितमिव प्रतीयमानं स्वभावेन निष्कलं निष्क्रियं निर्विकल्पं चिदेकरसमानंदघनमा
त्मानं स्वयमविक्रियमेव ज्ञानचक्षुषः ज्ञानं प्रमाणाभावापलब्धुद्धिवृत्तिलदेव चक्षुः रूपादिग्रहणे चक्षुरिव स्व
रूपग्रहणे येषां ते ज्ञानचक्षुषः शुद्धात्मानो यतयः पश्यंति आहारादिषु सर्वेष्वपि कर्मसु सर्वदा स्वमात्मानं नि
ष्कलं निष्क्रियं निष्प्रपंचं सर्वोपाधिविनिर्मुक्तं परिपूर्णमेव पश्यंतीत्यर्थः विमूढा दृष्टादृष्टविषयाशावशीभू
तात्मानो देहादिषु बहिर्मुखाः सदसद्विवेकवैराग्यसंन्यासशमदमादिसाधनसंपत्तिरहिता मोहच्छन्नाः स
दृूपस्यात्मनः सम्यक्प्रबोधजविशेषज्ञानाभावादहमेवेदं सर्वमित्येवं दृष्टार्थानुरूपमात्मानं नानुपश्यंति किं
तु कर्ताहं भोक्ताहं सुखी दुःखी हतो हं ... प्रियेममेदं नष्टमित्येवात्मानं संसारिणं पश्यंतीत्यर्थः ॥१०॥ ननु ये तु सं
सिद्धाः प्रबुद्धाः शुद्धात्मानस्ते एवात्मानं सर्वोपाधिविनिर्मुक्तं केवलं पश्यंति न त्वन्ये इत्याशंकायां न ये तु मत्प्रसाद
संप्राप्तज्ञानयोगनिष्ठाः भवंति ते पि पश्यंति न त्वन्य एवं लक्षणा इत्याह यतंतो योगिनश्चैनं पश्यंत्यात्मन्यव
स्थितं यतंतो प्यकृतात्मानो नैनं पश्यंत्यचेतसः ॥११॥ शास्त्राचार्यात्मेश्वरप्रसादसंपन्नाः सत्त्वात्सदसद्वि
वेकतीव्रवैराग्यशमदमादिसाधनसंपत्प्राप्तं ततः श्रवणमननादिभिर्ज्ञाननिदिध्यासनप्रयत्नवंतः संततं तेन लब्धज्ञाना

र्थः ॥७॥ इंद्रियाणि संगम्य शरीरं नं गत्वा तत्र विकारेणे साकं ग्राहयामाह श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च अधि
ष्ठाय मनश्चायं विषयानुपसेवते ॥९॥ श्रोत्रं चक्षुः स्पर्शनं त्वगिंद्रियं चकारः समुच्चयार्थः रसनं जिह्वा घ्राणमपि ए
वोऽप्यर्थः चकारात्कर्मेंद्रियाणि पि मनः षष्ठमंतरिंद्रियं चकारात् बुद्धिमहंकारं चाधिष्ठायोपादाय भोगसाधनानि कृ
त्वा स्वयमयं जीवः क्षेत्रज्ञ आत्मा शरीरे वर्तमानः सन् विषयान् शब्दादीन् उपसेवते उपलभते एतस्मिन् बुद्ध्यंते लौ
चारित्वाद् दृष्टेवसरे पंचपापं वे नि अवरोधे दिंद्रियार्थसन्निकर्षान्समुपगमानाः प्रणयपापत्रि पामिंद्रियाणि
योऽत्र पश्यपती समर्थः अत्र न पारीरं य द्वावाक्षो तिपनान्नुनत्रामती ति शरीरादनत्रामणो नत्संक्रमणाप्रतिपादनेनात्म
नो जीवस्य सूक्ष्मशरीरविशिष्टत्वं हेयोपादेयानस्थूलाद्भिन्नत्वं च प्रतिपादितं मनः षष्ठानींद्रियाणि कर्षतीत्य
हीत्वा संयातीत्युक्तमात्मा स्वयं ग्राहकयोर्भेदस्य मनस्स सत्ता बुद्धिमात्रोपाधिमत्ता मिंद्रियेभ्यो मनसो पि भिन्नत्वं च प्र
तिपादितं श्रोत्रं चक्षुरित्यादिना श्रोत्रादींद्रियाणि मनो बुद्धिं चोपादाय विषयानुपलभत इत्यनेनात्मोपलब्धृरूपा
देयेभ्यः श्रोपलब्धेभ्य अभिन्नत्वस्य प्रत्यक्षत्वादिंद्रियेभ्य इंद्रियार्थेभ्यो मनसो बुद्धेश्च भोगायतनदेहादपि व्याति
रिक्तत्वमेव सम्यक्प्रतिपादितं एतेन चक्षुषः साक्षी श्रोत्रस्य साक्षी वाचः साक्षी मनसः साक्षी बुद्धेः साक्षी प्राणस्य
साक्षी तमसः साक्षी सर्वस्य साक्षी ततोऽविक्रियः इत्यादिश्रुतिप्रसिद्धमात्मनः सर्वसाक्षित्वमेवाऽविक्रियत्वं च प्र
चितं भवति ॥९॥ एवं देहेंद्रियमनोबुद्ध्यादिभ्यो भिन्नमविक्रियमकर्तारमभोक्तारमेवात्मानं स्वं सर्वसाक्षित्वेन
स्थितं महात्मनो ब्रह्मविदः सर्वदा यद्रूपमनुभवंति विद्यानमूढा न पश्यंतीत्याह उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वि

१० योऽकत्वमेवतेन सूर्यचंद्राद्युपलक्ष्य हमेवमपविभ्रः तिलात्तत्त्वमद्बुद्धिः कर्त्तव्येति बोधितं भवति॥१२॥ किंच गामाविश्य
च भूतानि धारयाम्यहमोजसा पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः॥१३॥ अहमीश्वर एव ओजसा
अपरिमितमायाशक्तिबलेन गां भूमिं जलं स्वबले हसभावित विकरण त्वबलेनाविशतिमिवाविश्य सर्वतो व्याप्य
भूतानि स्थावरजंगमानि सर्वाणि धारयामि यथा वायुः स्वशक्त्या मेघमंडलं प्रविश्य जलानि धारयति तद्व
दित्यर्थः पश्चान्नौ द्विपवाहृद्युमें घमंडलेन दृश्यते तथापि योगी ह स्वाङ्गत्मा च विचार्यमाणो वायुव्यतिरेके
णमेघस्य पृथक्स्वरूपेण विघनेन ततो योग्यादौ व्याप्य स्वव्यापके नेर्भाव दर्शनात्तद्वच्छक्तिद्वारमश्रामाया
66 भूमेर्व्यतिरेकेण पृथक्स्वरूपेण विघतेन ततो भूम्यां सर्वत्र मद्बुद्धिः कर्त्तव्येत्यर्थः रसात्मकोऽमृतरसात्मकः पयः
स्वरूपो वा यः सोमः स एव भूत्वा चंद्रस्वरूपेणास्थितः सन् हंत्री हि पवर्गो घमाघावृ सलनात्नरणात्स्याघास्व
सर्वौषधीः पुष्णामि पुष्टिमतीः करोमीत्यर्थः एतेन चंद्रोपि चंद्रमत्ररसेन भाः सर्वाश्चौषध्यो पिममविभू
तिलत्वमद्बुद्धिः कर्त्तव्येति सूचितं भवति॥१३॥ किंच अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः प्राणापा
नसमायुक्तः पचाम्यन्नं चतुर्विधं॥१४॥ अयमग्निर्वैश्वानरो यो यमंतः पुरुषे येनेदमन्नं पच्यते इति श्रुतेः एम
ज्ञो यो जठरेग्निः स एव भूत्वाहं वैश्वानररूपेण प्राणिनां सर्वेषां देहमाश्रितः तस्य महत्त्वेन धिर्विश्वाचि
विश्वतोमुखः इति नाम्नास्पति तिष्ठतीति च श्रवणात्प्राणिनां देहोस्थितामा प्राणापानसमायुक्तः प्राणापाना १०
भ्यामुच्छ्वासनिश्वासरूपाभ्यां पावकसहकारिभ्यां संज्वाल्यमानः सन्नहं भक्ष्यभोज्यलेह्यचोष्यभेदेन चतुर्विधं प्राणि

येयतयो योगिनो भवंति लक्ष्यैकतानां समासाद्य निर्विकारेण परमात्मनि मनसो निश्चलत्वेन स्थितिर्योग इतीर्यते इत्युक्त
लक्षणलीनमनो येषां वैराग्यादिभ्यो बहिःप्रावण्यं वैमुख्येन चित्तस्यात्मन्यविकारेणात्मना स्थितिर्योगो येषां
ते योगिनः स्वात्मन्येवाहितचित्ता भवंति तेपि चात्मनि शुद्धावबस्थितं बुध्यादिप्रकाशकमात्मानं पश्यंत्ययमेवा
हमिति स्वात्मना साक्षात्कुर्वंत्यस्याहमकर्त्ताहमभोक्ताहमसंसारी तामेव पश्यंती सर्व्वअत्मप्रसादरहिता येन यतंतः
श्रवणमननादिभिरात्मसाक्षात्कारसिद्धये वहुधा प्रयत्नं कुर्वंतः अपि चेतः अविवेकिनोप्यकृतात्मानः अकृतोवा
स्यवासनाभिर्विषयकर्मणा स्त्र्यादिगोचराभिरेव पुष्टीकृतो बहिरेव प्रवाहायमान आत्मा चित्तं येषां ते अकृतात्मा
नोऽज्ञा विद्याभिमानरागद्वेषाभिनिवेशविशिष्टा एवाचेतसो विवेकप्रधाना बहिर्मुखत्वान्न पश्यंत्ययमेवाहम
स्मीत्यात्मानं निर्विशेषं परंब्रह्म स्वात्मत्वेन न विजानंतीत्यर्थः॥११॥ प्रसादघनत्वचनाम्यप्रकृतात्मनां प्रसाद
भावाद्यत्नसाक्षात्काराभावत्वसंस्मात्प्रकाशोर्मप्रसादसिध्यै मद्रूपाभिरवत्वं वक्तव्यमिति बोधयितुं स्वस्य सर्वात्म
प्रतिपादयति चतुर्भिः सर्वत्र मद्ध्यानमद्रूपालिं कुर्वतां रागादिदोषा न भवंति तेन चित्तप्रसादो ज्ञानं च सिद्ध्यतीति
यदादित्यगतं तेजो जगद्भासयतेऽखिलं यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं॥१२॥ आदित्यगतं आदित्यस्य
हितं स्थं सर्वतो व्याप्य वर्त्तमानं यत्तेजोऽखिलं जगद्भासयते तेन प्रकाशयंदमापि तेजः जगद्भासयते न प्रकाशयद्योते
जः जगद्भासयते तत्तेजो मामकं विद्धि यद्यपि हि न त्वाभितिष्ठापेन आदित्यादीनां तेजो व्यतिरेकेण दृश्यत्वरू
पाभावात्तेजोमात्रत्वमेवेति सिद्धं स्वरूपं चंद्रात्मात्मकं तेजो मामकमिति मत्त एव हेतोः शिष्टं इतिवचनमवच्छद्व तेजःशब्दार्थ

११

तः सएवाहमीति तस्मिन्नेवात्मनि स्वात्मत्वस्मृतिः सर्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च ब्रह्ममात्रत्वज्ञानं च भव
तीमदुपास्तिविहीनानां मलिनबुद्धीनां रागादिदोषदुष्टानां मन एव ब्रह्मणस्त्वपोहनं तयोः स्मृतिज्ञानयोरपोहन
मसंभवश्च भवति किंच वेदांतकृत्पौराणां विदधाति यद्वेदांतदर्शसहितो नितरां श्रुतिश्रवणात्स्व
ह्मणो वेदांतानुग्रहकर्त्ताहमेव पद्यालोके शिष्योपाध्यायाचार्यरूपेण वेदांतार्थप्रकाशनकर्त्ताहमेव च वेदविद्वेद
र्थावत्ताति विशेषणमदनुग्रहात् एव वेदार्थावयः स्वात्मना वेत्ति सर्ववेदविन्न ब्रह्म वेत्ताहमेव सर्वस्य चाहं हृदि सन्नि
विष्ट इति सर्वस्य प्राणिमात्रस्याभ्यात्मस्वमात्रत्वे सिद्धे वेदांतकृद्वेदविदेव चाहमिति विशेषोक्तिः मूढानां

67

ममूढानां च वेदांतोपदेष्टृत्वेन च मत्सविधे पितृवत्परमेश्वरत्वबुद्धिर्विश्वरूपकर्त्तव्येति बोधनार्थं यतू हृदि सन्ना
त्ते जनस्यादिनामग्रतप्रसूतासार्थ्यत्व विमतो मम निपादितायां समाप्ति एमेव परमेश्वरस्य यावन्मात्रं कल्पयामिति
मामेव स्वपायात्म्यं बोधयितुमाह वेदैरिति सर्वैर्वेदपदैरहमामनंतीति माये न सर्वैरंगादिभिर्वेदैर्वेदांतैर्वै घस
त्वं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्म आनंदो ब्रह्मेति देवहस्तापूर्वमस्थूलमनणु स्वप्रमाणमप्युत्तमशब्दो
त्रमवागमनो ऽन्तेजस्कमचक्षुष्कमनामगोत्रमपाणिपादमस्पर्शमरूपमव्ययमनिष्कलं निष्क्रियं शांतं निरंजनं
द्वमुक्तं सत्यं सूक्ष्मं परिपूर्णं महदपं सदानंदचिन्मात्रं शांतं चतुर्थं मन्यंते स आत्मा स विज्ञेयः तत्त्वमसीत्यादिभिर्ज्ञा
तव्यो ऽयो नि... विशेषनिरंजनं शुद्धबुद्धमुक्तस्वभावः सच्चिदानंदैकरसो ऽद्वितीयः परमात्मा सएवाहं परमार्थतो
नैवेद्यन्तत्त्वस्तात्मायोपाधिकः इत्यर्थः ॥ १५ ॥ विचक्षणानां ज्ञानिशुद्धात्मानां सत्समबुद्धीनामेव मुमुक्षूणाम्

राम

११

मिर्युक्तमन्त्रं प्रचामि पद्मपाणीनामिति सामान्योक्त्या सर्वैरपि प्राणिवाङ्मुंजमानेसन्तं अघनस्त्वलं पार्थिवं आप्यं
तैजसं वायव्यं चैवं रूपेण चतुर्विधं प्रचामि मनुष्यादीनां पार्थिवं चानकादीनामाप्यं वालविस्मादीनां तैज
सं सर्पादीनां वायव्यं एवं लक्षणां तत्तज्ज्वालाजठरे स्थित्वा नेत्ररि तमन्नं पचं कं वां तामीत्यर्थः एतेनाग्निस्वरूपेण
मया आर्यदं जलमज्जकं व्याप्यानां प्राणिनां मध्यतिकेण व्यक्तस्वरूपाभावात्तेषु मया व्याप्तेषु प्राणिषु स
र्वत्र मद्बुद्धिकर्त्तव्येति सूचितं भवति ॥१४॥ एवं जाठराग्निस्वरूपेणेश्वरेण व्याप्तानां सर्वप्राणिनामीश्वरविभ
क्तित्वेनेश्वरमा त्रत्वे सिद्धे पि ममममादाभ्यामव्यापशिष्टा पंच ष्टोपसृष्टो पञ्चस इतिभेदबुद्धिरीश्वरे
पासके मिर्न कर्त्तव्येति तेषां सर्वत्र परमेश्वरत्वबुद्धिदार्ढ्याय पुनरपि सर्वेषां प्राणिनां हृद्यव्याप्तत्वमा
त्मनि त्वोपपत्या आत्मनात्मना ज्ञानेन तद्विपरीतानां ज्ञान चमत्तएव वासिध्यतीति प्रतिपादयन्नि सर्वस्य चाहं हृ
दि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहं ॥१५॥ ममैवांशो जी
वलोके जीवभूतः सनातन इति ईश्वरो जीवकलपामविरद्भुतं कृत्या सर्वस्य चब्रह्मादिलेखांतस्य प्राणिजातस्य क
ः सन्निविष्टस्य सर्वप्राणिनामन्तःस्थ नार्थः हृदि बुद्धिगुहायामहंपरमात्मा स्वेनरूपेण सन्निविष्टः सन्निहितो मत्ता
तिष्ठाम्यतः प्राणिवर्गः सर्वो मद्रूपमेवेत्यर्थः एतेन भेददृष्टेर्नैवकाशः इति सूचितं एवं सर्वं परमेश्वर एवेति सर्वत्र
मद्बुद्ध्या परमेश्वरोपासितं कुर्वतां नामकुर्वतां च फलमाह मत्त इति मत्तः परमेश्वराद्देवमद्यपास्याः सुद्धात्मनाश
र्वचार्पितत्त्वसत्त्वत स्मृतिः सम्प्रज्ञातमात्तममसीति श्रोत्रहमिति निर्विशेषाद्विविधपरिच्छेदस्यान्यः आत्मानामिति वोधि

क्षरः पुरुष इत्यर्थः महदादिपृथिव्यंतः समष्टिव्यष्ट्यात्मकः स्थूलसूक्ष्मप्रपंचलक्षणो कार्यराशिः कूटस्थ
उच्यते सर्वोपि विकारमात्रः तत्र कूटस्थकार्ये सर्वत्र कारणत्वेन घटादिषु मृदिवव्याहितत्वेन सर्वतो व्याप्य ति
ष्ठतीत्यव्यक्तं महदादिशब्दवाच्यं कूटस्थ इत्युच्यते पक्षान्तरे तत्र संतानेः प्रत्रिका संताने स्वमूलभूतः पुरुषः कू
टस्थ इत्युच्यते तद्वत् कार्यसंतानेः तमः कार्यसंताने सतत कार्यसंतते स्वमूलभूताविद्यात्मिका शक्तिः कू
टस्थ इत्युच्यते पक्षान्तरे कूटसाक्षी मत्र कूटशब्दः कपटवाची तत्र कूटे कपटे छद्मवेषविपरीतभावाचरणो तिष्ठतीति
कूटस्थो मायोपाधिर्वा स उच्यते सोऽक्षर इत्युच्यते तदयमेवात्मनः संसारित्वस्य कारणमेतन्निवृत्तिकारण
न संसारानिवृत्ति इति मायेनतु योनिरस्त नमेव एवं निरंजनो दोषविशेषपरोक्षरणो वानाभावाय सा पुनः
नात्माऽनात्मवत्तमेव विदेहमुक्तौ वा रणामितिपूर्वमेवोक्तं तन्न विस्मर्तव्यं॥१६॥ एवं क्षराक्षरयोः कार्यकारणयो रूप
योः पुरुषशब्दवाच्यत्वं यानि पा घटतामपि वोपाधिभ्यामुभाभ्यामभिन्नं तद्धर्मवान् मोक्षस्पृष्टानिमपुरुषं बद्धमुक्त स्व
भावं परशब्दार्थं गुणोपसर्पणं तत्त्वं निर्दिशति उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य
बिभर्त्यव्यय ईश्वरः॥१७॥ उत्तमः सर्वोत्कृष्ट तमः द्विविधपायाभ्यां तत्र क्षाजयानि निःश्रेयसो मा यो अक्षर पुरुष इति सर्वो
त्कृष्टतमत्वश्रवणात् आत्मा स्वयमुत्तमस्तनयाः सर्वाच महत्तमो निरतिशय वैभवः परिच्छेदरहित इति यावत्
तएव सर्वतः परिपूर्णोत्वात् पुरुषः उत्तमत्वमुत्तमत्वे सति पुरुषत्वं स्यात्मा नत्वगामित्वसूचनार्थमलं शब्द
तमत्वविशेषणो विशिष्टः पुरुषस्त्वन्यः क्षराक्षरशब्दवाच्याभ्यां संसारिसारकारणाभ्यां पुरुषाभ्यां

एम
१२

मी

द्यात्मनो विवेकवैराग्यसिद्ध्ये संसारं दुःखत्वेन वर्णयित्वा तत्पश्चात् नाम विवेकि नाम विरक्तं नाम ज्ञानोपनतं विना न क
दापि च मोक्षप्राप्तं सिध्यति विवेकोऽपि न वैराग्यं विना नेनं प्रसंछित्वा सदसद्विविच्य परं तत्त्वं ज्ञात्वा स्मिति त
त्र्यानेम प्रवृत्तिसिद्ध्ये ब्रह्मविदां ब्रह्मप्राप्तिं तन्मात्मिसाधनं तत्फलं च निरूप्याधुना तेषां ज्ञानविषयस्वरूपब्र
ह्मणः स्वरूपमनन्तत्वसर्ववेद्यवोधयति त्रिभिः तत्राद्येन परस्य ब्रह्मणः पुरुषोत्तमाख्यस्य परस्य स्वरूपं पुरुषो
त्तमत्वं तितो पुरुषोत्तमकृति तत्कार्यत्वस्य रागादुपाधीनि दिव्यानि पदप्रवादेन ब्रह्मणो ऽ संसारित्वं निर्विशेषत्वं च
द्वैतनिरसनत्वमद्वितीयत्वं च सिध्यति द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च क्षरः सर्वाणि भूतानि कूटस्थो
क्षर उच्यते ॥१६॥ लोके द्वावेव कारः सगुणसमर्थः क्षरः स्वकाले क्षरति नश्यतीति क्षरः नश्वरो महदादि स्थूलान्तः संसा
रत्वलक्षणः कार्यवर्गः सर्वोऽपि एकः पुरुषः अक्षरश्च सगुणसमर्थः पुरुषो द्वितीयः क्षरोपाधि स्वकाले क्षरति न
पापं न क्षरतीत्यक्षरः परमात्मविज्ञानेन विना न विनश्यति म्नत्वमहद्भिः संसारकारणत्वलक्षणः पुरुषः पुरुषस्या
त्मन उपाधित्वेन द्वयोरपि क्षराक्षरयोः पुरुषत्वं तत्त्ववत्त्वैः परिच्छिन्नत्वाद्यनेकत्वादस्तत्वा [illegible]
[illegible] द्वितीय स एवकारेणानुसंधानम [illegible] विनियोगस्यतात्विमो [illegible] क्षराक्षरौ द्वावेव पुरु
षौ लोके संसारे पुरुषस्यात्मनः संसारित्वसिद्धये क्षराक्षरौ द्वावेव पुरुषोपुरुषोपाधीनान्यत्वेनः कश्चिदिति
वक्तव्यः यो ये क्षराक्षराविमा कांक्षायामाह क्षरः सर्वाणि भूतानीति भूतान्याकाशादीनि भूतानि निर्दे
क्रियाशीनि भूतकार्याणि सर्वाणि क्षरः उच्यते अभिव्यक्तनामरूपात्मकं महदादिविकारजातं देहान्तं सर्वं क्षर

१२

दिश्रुतिभिः प्रतिपादितइत्यर्थः परमत्वचेतनत्वज्ञातृत्वप्रकाशकत्वादिधर्मैर्ज्ञानमयस्वरूपह्येषुस्फुरत्स्वात्मभ्यां संसा
रहेतुभावापन्नाभ्यांप्रकृष्टाभ्यामन्यत्वंप्रतिपादितंतदेवपुनर्विशेषतोविस्पष्टयतियोलोकत्रयमितिस्थूल
सूक्ष्माभ्यामात्मनोभिन्नत्वमेवाह अव्ययइतिस्वस्वविसमाधौः क्रमात्त्रयोर्व्यपेनाशेसति अपित्ववपंन
व्येतीत्यव्ययः हेतुगर्भितमिदंविशेषणं आत्माप्रकृष्टाभ्यामन्यः अव्ययत्वात्पल्लवत्तन्नैवंयथावत्व्यादिःसुषु
प्तिसमाधौ तत्रद्वयसाक्षितयाविद्यमानत्वादात्मनोव्ययाभावात्तनोनित्यत्वेनताभ्यामन्यत्वमुत्तमत्वंच
सिद्धमितिंचईश्वरः स्वसत्ताविभाजेनान्यायोव्याप्नोतिहेतुत्वादीश्वर हेतुगर्भितमिदंविशेषणं आत्मातताभ्यांभिन्न

69

:तत्प्रकृतिहेतुत्वानराजवत्स्वप्रवर्त्तमप्रधानादिभ्योऽत्तोपयामिश्रत्वमुत्तमत्वंचतद्वदात्मनोपिस्वप्रवर्त्योभ्यां
भ्यांभिन्नत्वमुत्तमत्वंचसिद्धंमितिंचयोलोकत्रयमाविश्यबिभर्त्तिलोक्यंतेज्ञाप्यंतइतिलोकाः समष्टिव्यष्टिस्थूल
सूक्ष्माः स्थूलसूक्ष्मकारणादेहाः साभिमानिनः सावस्थास्तेषांत्रयंलोकत्रयंस्थूलसूक्ष्मकारणाख्यंशरी
रत्रयंस्वाधारभाविश्यवहिरंतश्चसर्वतोव्याप्यबिभर्त्तिसत्तांस्फूर्त्तिंचप्रयच्छन्धारयतिअव्यक्ताव्यक्तमेतेविश्वमी
शपृतिश्रुतेः आत्मास्वधार्यालोकत्रयाभिन्नः आधारत्वात् चित्राधारवस्त्रवदिपात्मनस्ताभ्यांभिन्नत्वमुत्त
मत्वंचसिद्धंयद्वालोक्यंतेदृश्यंतइतिलोकाःजाग्रत्स्वप्नसुषुप्तयः साभिमानिभोग्याव्यांस्तासांत्रयंलोकत्रयमावि
श्यव्याप्ययोविभर्त्तिप्रकाशयतिजाग्रत्स्वप्नसुषुप्त्यादिप्रपंचंप्रकाशयतइतिश्रुतेः आत्मास्वप्रकाशेनलोक
त्रयाभिन्नः प्रकाशकत्वात्सर्पवदितियोजागरमनंभवंपः स्वप्नमद्रसयः सबलमस्वापसंसोहमितिप्रामीतिप्रत्यभिज्ञा

एम
१२

२

मम: परमे महत्त्वेन चेतनत्वेन ज्ञातृत्वेन प्रकाशकत्वेन प्रकाशस्वरूपत्वेन चोत्कृष्टत्वाज्जमत्वविशेषणा विशिष्टः

पुरुषो: संसारी प्रत्यगात्मा नाम्ना पुरुषात्पाप्मकलस्पर्शतो भिन्न एव भवति यथा स्थावरजंगमात्मानत्मकाश

कोज्ञानाच भानुस्तात्प्या भिन्नस्तद्धर्मकर्माद्यस्पृष्टश्च भवति तथैवाहमज्ञ इतिदेहात्ममाय महंकारादिरिति त्वप्रका

शाभ्यामज्ञानतत्कार्याभ्यां ज्ञानानन्दप्रकाशकस्वात्मा भिन्न एवानुभवपनेन नोज्ञातृत्वेनातिरस्कृतत्वेनासंगत्वे

न चताभ्यां भिन्न एव सन्नतद्धर्मकर्मादिभिरस्पृष्ट एव न इति ज्ञानस्यास्य स्फुर्थः। ननु महतोप्यतिसूक्ष्मस्यापि च वाय्वो:

स्वाभिमुख्येऽपि धाऽस्पृष्टद्वयोः संयोगेऽस्पृष्टस्पृष्टयोरेव धर्मयोर्दृष्टपनेऽङ्गीकृतं ... इति न हृदात्मनो पि पुरुषोत्तमस्य तत्र

एतत्र भिन्नत्वेपि न चोगान्तद्धर्मकर्मादिभिः स्पर्शादिपाशंकायां नसावयवत्वाद्वाय्वो: सर्वं संभवति निरव

यवत्वादिधर्मैरेनामनाभ्यामपि परमत्वान्नतद्धर्मकर्मादिभिर्लिप्यत इति बोधयति परमात्मेति अन्योन्तरआ

त्माप्राणमय इत्यत्र मयपादीनां कूटस्थानांनां कोशानामात्मत्वश्रवणात्तत्र शब्दवाच्येभ्यः पुरुषेभ्यो

निरवयवत्वेनातिरस्कृतत्वेनांतरत्वेन महत्त्वेन ज्ञातृत्वेनभासकत्वेन व्यापकत्वेनासंगत्वेन च निरतिशयत्वाद्।

त्मा परत्वलक्षणः प्रकृतिजनकार्येभ्यः सूक्ष्मशुद्धत्वेन परमेशसव्यपरमेश्वरत्वात्मात्मा परमात्मेत्युदाहृतः

इंद्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः महतः परमव्यक्तमव्यक्तात्पु

रुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति दिशोत्तमत्वं पुरुषः सर्वात्मात्मा नरोत्तमः अथातो

त्थमनास्मिकोपसमन्यते। पत्रति ... तोज्यायांश्च पूरुषः पादोस्य विश्वाभूतानि त्रिपादस्यामृतं दिवित्यादि

१४

चित्रमतीसमितिालिखितीत्यत्र दृष्टान्तः सम्यग्ध्यानाच विचार्यमाणो मितिव्यतिरेकेण चित्रस्य स्वरूपं न दृश्यते मिति
सत्ताव्यतिरेकेण चित्रस्य पृथक् सत्ताभावात् तद्वत् सदेव सर्वं भावनीतो हमित्यत्र विवक्षितो न हि वस्तमाया
मात्रमिदं द्वैतं असत्वादस्येत्यादिश्रुतिभिरिदं सर्वमसन्मायाकार्यत्वात् इंद्रजालवत् सर्वं सदेव सद्रूपत्वात्
मृदग्रूपघटादिवदेव यथोत्यादिपुत्रिमित्रं विचार्यमाणो यथामात्मसत्ताव्यतिरेकेणान्यः पृथक् सत्ताभावा
त्सर्वं त्वेतद्ब्रह्मेत्यादिश्रुतिवाक्यबलाद्वा पुरुषोत्तमात्मत्वं परं ब्रह्माद्वितीयमेव भावनीनतः सर्वं ब्रह्मैवेति ज्ञातव्यमि
तिसिद्धं ॥१८॥ एवं स्वमायातत्कार्यसंबंधरहितत्वेन स्वस्यानिस्पष्टं ब्रह्मत्वं स्वभावत्वं प्रतिपाद्य मामेवं लक्षणं
यो विजानाति स कृतकृत्यो भवतीत्याह यो मामेवमसंमूढो जानाति पुरुषोत्तमं स सर्वविद्भजति मां सर्वभावेन भारत ॥१९॥
जन्मानेकसहस्रेषु कृतभक्तिप्रभावतः मां पाधितपरमेश्वरप्रसादप्राप्तः शुद्धात्मा देवसंघद्विशिष्टोपासनादि
रधिकारी शमदमसंन्यासादिसाधनसंपन्नः श्रवणाद्विजन्मज्ञानेनैवं प्रतिपादितलक्षणं नित्यत्वे स्वात्मा
दिधर्मत्वेन सर्वविलक्षणं पुरुषोत्तमं सर्वसंसारधर्मविनिर्मुक्तं सद्वानंदैकरसमद्वितीयं मां परमात्मानं जाना
स्वयमेवाहमिति स्वेन मनसा साक्षाद्विजानाति स सर्ववित् सर्वं ब्रह्मैवेत्यपरोक्षतया सर्वं ब्रह्मैवं वेत्तीति सर्ववित् स
र्वज्ञ एवासंमूढः देहेंद्रियादिष्वहं ममेति बुद्धिर्यस्य स संमूढस्तद्विलक्षणोऽसंमूढः देहादावहंभावममभावनि
र्मुक्तः सन् सर्वभावेनाहमेवेदं सर्वमिति भावः सर्वभावस्तेन सर्वभावेन सार्वात्म्येन सर्वात्मभावापन्नो मां भजति मामे
ति पातितेस्मिन् देहपरागात्मनाति कृतीत्यर्थः यद्वा यो मुमुक्षुरसंमूढः विषयाशाग्रहग्रस्तः संमूढस्तद्विलक्षणोऽसंम

१४

पाविद्यमानत्वादात्मनः प्रकाशकस्यान्तोवत्त्वपादिन्नते श्रुतिरनुमानं प्रत्यक्षं च प्रमाणमात्मनो नोकत्र यप्रकाशवे

त्वासिद्ध्यानित्यत्वं पाममहत्वं चेतनत्वं प्रकाशस्वरूपत्वमकर्तृत्वमभोक्तृत्वमविक्रियत्वं वासिद्धं प्रमेयत्वेनेश्वरात्वे

नभर्तृत्वेन वस्यप्रस्यात्मपोह्याभ्यामपि पुरुषाभ्यामुक्तरूपत्वमत्वादात्मनः पुरुषोत्तमत्वं सर्वप्रमाणसिद्धमिति भा

वः॥१३॥ अल्पपत्वेश्वरत्वमर्तृत्वादिधर्मैः पुरुषोत्तमत्वसिद्धिमकारमेव विशदयन् तादृशानामसिद्धार्थवत्तामम

वेदृशा ह्यमसिद्धेतिमाति यादनद्यारात्वस्या विक्रियत्वमसंसारित्वं साक्षिदानंदैकरसत्वमधिष्ठीयत्वं च स्वपतिपसा

नस्यामतीतोहमस्यादपि चोत्तमः अपतो स्मिंल्लोके वेदे च प्रथितः पुरुषोत्तमः॥१८॥ यस्मात्क्षिसत्वत्तान्त्वादिध

र्मैः स्वमहदादिस्थूलांतम्रान्तिलयादिविकारविशिष्टं सर्वात्त्वभोक्तृत्वादिसंसारधर्मकं कार्यलक्षणं पुरुषम

हमतीतोऽतिक्रान्तोस्मि नित्यत्वादिधर्मैर्विलक्षणत्वेनोत्कृष्टत्वादुत्तमोस्मीत्यर्थः तथाप्रकाशस्वरूपत्वप्रका

शकत्वाधारत्वादिधर्मैर्महत्वादक्षरात्संसारबीजादव्यक्तादपि चोत्तमोऽस्मि यस्मादतोस्मादेव लोके पुराणे वेदे च

वेदेषु च पुरुषोत्तमः पुरुषाभ्यामुक्तलक्षणाभ्यां निष्कृष्टत्वनित्यत्वनिर्गुणत्वचेतनत्वादिधर्मैरुत्तमत्वात्पुरुषोत्तम

इति प्रख्यातः धर्मतत्कर्मतद्वत्त्वासंबंधत्वेशाश्रुतत्वान्नित्यशुद्धबुद्धमुक्तस्वभावः केवलसाक्षिदानंदैकरसः प

रमात्मेति प्रथितः प्रख्यातः महतोऽनन्तः पुरुषोत्तम अव्ययात्मप पुरुषः इति पुरुषोन्तपरं किंचिदिति अयमात्मास

न्मात्रो निरंशः शुद्धोबुद्धः समोऽजातोनिरंजनोविश्वरूप ज्ञानं ईश्वरः प्रमाणैकरसहृतनित्येभ्यो विलक्षणः साक्षी चि

न्मात्रोहंस्यादशिवरूपात्स्वतिभिः कार्यकारणसंबंधरहितः केवलः शिवहत्यादि स्मातिभिश्च प्रतिपादितइत्यर्थः

गीतातात्पर्यबोधिनी

71

चराचरात्मकेन सर्वात्मानमेव मां विदुः एते ते निवृत्तमतो मिलं ते हेंद्रियादिकं वात्मानं वा वेदनक्रियां वा प्राप्तिज्ञानं वा दिव्यं ज्ञान
एवान मरणे ते निनपयंति नं स्मरंति चेतसः ३० इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानंदात्मसरस्वतिशिष्यश्री
रामकृष्णानंदसरस्वतिकृतौ गीतातात्पर्यबोधिन्यां सप्तमोध्यायः ॥७॥ ॥ श्लोक १०७४ मी॰ का॰ शु॰ [illegible] ॥
ॐ सप्तमाध्यायान्ते हृदयस्थत्वादिगुणकं निर्विशेषं प्रमाणाऽगम्यं परं ब्रह्म स्वात्मनाऽधिगंतुमशक्तानां मंदप्रज्ञानां भेददर्शनहे
तुभूतं वा ह्य वासना परलभिः शेषनिवृत्या चित्तप्रसाद सिद्धो निर्विशेषज्ञानयोग्यता भवत्यनीति सगुणब्रह्मोपासने मुप के
म्यते ब्रह्म तद्विदुरित्यादिना अध्यात्माधिभूताधिदैवाधियज्ञादीनां ब्रह्माऽभिन्नत्वदर्शनलक्षणमुपासनं सूचयित्वा तदुक्तानां
ब्रह्मादीनां स्वरूपं विविच्य दर्शयितुं प्रयाणकाले मुमुक्षोः कर्तव्यं ध्यातव्यं प्राप्तव्यं च वक्तुं इति पादयितुमनरावृत्तिसहित
रहितस्थानयोः स्वरूपं बोधयितुं कर्मिणां मुपासकानां च गंतव्यं मार्गं प्रदर्शयितुं चाष्टमाध्याय आरभ्यते तेनत्रादौ तद्ब्रह्मेत्यादिना
निर्दिष्टानां ब्रह्मादिपदानामनेकार्थत्वादत्र योग्यमर्थमजानानस्तद्बुभुत्सया अर्जुन उवाच किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरु
षोत्तम अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते १ अधियज्ञः कथं कोऽत्र देहेस्मिन्मधुसूदन प्रयाणकाले च कथं ज्ञेयोऽसि
नियतात्मभिः २ एवं वरयोरुभयोरपि ब्रह्मशब्दार्थत्वात् अत्र विवक्षितं परं वा किमपरं वा ब्रह्म तदुच्यतां आत्मानं देहमधिकृत्य
तिष्ठतीत्यध्यात्मत्वं श्रोत्रेंद्रियादीनां प्रतीचश्च संभवात् किमध्यात्मं प्राणो वा श्रोत्रादिर्वा तत्त्वात्मा वा कर्मणोपि श्रौतं स्मार्तं लौ
किकं चेति त्रैविध्यात् कर्मशब्देन किं विवक्षितं भूतानां कार्यकारणभेदेन पृथिव्यादिभेदेन चानेकत्वसंभवात् अधिभूतमिति
किं प्रोक्तं किं चाधिदैवतमित्यत्रादित्यादेवाः सर्वे वा उतैकदेशो वा तत्संबंधी यत्किंचित्[illegible]पातरं वा किमुच्यते अधियज्ञ इति वि

१४
गै पो

ज्ञानं यज्ञं न तु न इति यज्ञो वै विष्णुरिति यज्ञमधिष्ठित्यावस्थिते तस्य यज्ञान्यत्वापत्तेः संभवाद् नचैतावानात्मा वा विष्णुर्वाऽन्यो वा कोऽधियज्ञोऽस्मि
न्नः स चात्र देहे कथं तिष्ठति साकारेण वाप्युत निराकारेण तु ध्यायन्नतमो वाभिन्नो वा किंच प्रयाणकालेऽपि नियतात्मभिः समाहित
चित्तैस्त्वं कथं केन प्रकारेण ज्ञातव्योऽसि सगुणरूपेण निर्गुणरूपेण वाऽन्येन रूपेण वाऽन्यथा वा सर्वं सम्यग्वक्तव्यमिति पृच्छति किं त
द्ब्रह्मेत्यादिना २ सप्तानामपृष्टानां प्रश्नानां क्रमेण हृदुत्तरं यावद्बोधश्लोकयोः यस्याभिमतमर्थं वक्तुं श्रीभगवानुवाच अक्षरं ब्र
ह्म परमं स्वभावोऽध्यात्ममुच्यते भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ३ अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं अधियज्ञोऽहमे
वात्र देहे देहभृतां वर ४ अक्षरं अजो नित्यः शाश्वत इति श्रवणात् तत्तन्नाशनाभ्यां कालेनान्येन वा न क्षरतीति न श्यतीत्यक्षरं
पद्य अव्याकृतं तेन तत्कार्यं च सर्वं व्याहरिं तद्व्याप्रिरयः पिण्डमिवाऽक्षरणं नित्यामोतीत्यक्षरं सत्यज्ञानादिलक्षणं परं ब्रह्म एत
द्धेतदक्षरं गार्गीति श्रुते ननु ॐमित्येकाक्षरमिति संप्रयातमेतदक्षरं अक्षरं चेति प्रणवस्याप्यक्षरत्वं श्रूयते कथं
ब्रह्मणश्चाक्षरत्वमिति चेत् अक्षरस्य ब्रह्मणो वाचकत्वात् प्रणवस्याक्षरत्वं ननु नित्यत्वेनाक्षरत्वं तस्य प्रकृतिर्लीन
स्येति मलयभ्रवणान् क्षराये क्षयाऽव्यक्तस्याक्षरत्वं ननु नित्यत्वेन क्षरं हं प्रधानममृताक्षरं हर इति प्रकृतेः क्षरत्वं परस्य ब्र
ह्मणः एवाक्षरत्वं च श्रूयते ततो ब्रह्मैकमेवाक्षरं न ततोऽन्यदक्षरमस्ति तत् हि विशेषणवैयर्थ्यं दिति चेत् अब्रह्मणः सर्वं चैलक्ष
णपनिर्वाहार्थकत्वाद्विशेषणस्य सार्थकत्वोपपत्तेः क्षरमक्षरमिति पदार्थत्वेनोभयोः समत्वे प्राप्ते परममिति विशेषणं ब्र
ह्मणो निरवयवत्व निष्क्रियत्व नित्यत्व निःसंगत्व निर्मलत्व निरतिशयमहत्त्वातिसूक्ष्मत्व सदद्वितीयत्व चिद्घनत्वानन्दघ
नत्व सर्वव्यापकत्व सर्वप्रकाशत्व सर्वाधारत्वादिधर्मैः सर्वोत्तमत्वापादकं भवति श्रूयते च महतो व्यक्तमुत्तमं अव्यक्तात्पुरुषः परः

रामः
१
न

मूले परमिति विशेषणं = ४

३ वि गु

१५

सर्वमनुभूतंचभवतिब्रह्मानंदेसर्वानंदानामंतर्भावात्एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंती
तिश्रुतेस्तस्माद्ब्रह्मविदेवकृतार्थइतिसिद्धं॥२०॥इतिश्रीमच्छंकरानंदसरस्वतिकृतौगीतातात्पर्यबो
धिन्यांपुरुषोत्तमयोगोनामपंचदशोऽध्यायः॥१५॥

72

राम
१५

ऽः सर्वेषां प्राणिनां बुद्धिस्थितः स तं मामेवं लक्षणं पुरुषोत्तमं स्वात्मना जानाति स सर्ववित्तया सर्वभावेन सर्वात्मत्वे
वेति सर्वज्ञत्वेनैकदृष्ट्या मां भजति ज्ञानं तत्फलं प्राप्नोति एवं धर्मरहितः पापः सद्वा मामनुसंधत्ते ॥ ब्रह्मज्ञानस्यैतत्
त्फलं यत्पापाः फलं निर्मानमोहत्वादिसाधनसंपत्त्या सर्वभावेन मां सदा भजमानस्तद्व्ययं पदं गच्छतीति पू
र्वमेवोक्तमिति बोद्धव्यं ॥१९॥ अशेषोपनिषत्सारमिमाध्यायोपदिष्टं गीताशास्त्रस्येदमुपलक्षणं कृ
त्वा पंचदशाध्यायोपलक्षणमिदं शास्त्रं स्तौति … इत्थं बुद्ध्वा बुद्धिमान् कृतार्थो भवतीति प्रतिपादयन्न
ध्यायमुपसंहरति इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत ॥२०॥
इत्येवंप्रकारेण समयोक्तमिदमेतत् … निर्विशेषं … शास्त्रं बोधयतीति शास्त्रं पंचदशाध्याय
रूपं गुह्यतमं ब्रह्मस्वरूपप्रतिपादनपरत्वादुत्तमं गोप्यं यस्मै कस्मैचिदनधिकारिणे … संप्रति
पत्तेन वक्तव्यं … सुशीलः सर्वेषां … त्वमो
ऽसि कामो भवति … शास्त्रं … पादितम् … बुद्ध्वा सम्यक्
ज्ञात्वा बुद्धिमान् … ज्ञानमेवात्र बुद्धिशब्दार्थः … ब्रह्मज्ञानसंपन्नः … कृत
कृत्यश्च … शास्त्रसु … आत्मनो … मे … ज्ञानं
… सर्वे … सर्वं कर्माखिलं … विदेति … सर्वकर्मा … सर्वा
त्मनि … विज्ञाते विद्वान् सर्ववेद … शास्त्र … सर्वं कृतं भवतीति … ऽस्मत्प्रवृत्ते